Barcode : 99999990821990
Title - Kathapanchakam (1933)
Author - Row Kshama.
Language - hindi
Pages - 133
Publication Year - 1933
Barcode EAN.UCC-13

GL SANS 891.21
ROW
126953
LBSNAA

लाल बहादुर शास्त्री राष्ट्रीय प्रशासन अकादमी
...al Academy of Administration
मसूरी
MUSSOORIE

पुस्तकालय
LIBRARY

अवाप्ति संख्या
Accession No. 13283
वर्ग संख्या
Class No. 891.21
पुस्तक संख्या
Book No. राव क्ष

कथापञ्चकम्

KATHAPANCHKAM

By

KSHAMA ROW

(All rights reserved.)



Published by

Sahakari Granthakar

Nawakal Wadi, Girgaon,

BOMBAY 4.

1933.

Price Re. 1.

प्रकाशक:—
श्री. गोविंद भार्गव घाणेकर
व्यवस्थापक सहकारी ग्रन्थकार,
नवाकाळवाडी, गिरगांव, मुंबई ४



मुद्रक—
श्री. रघुनाथ दिपाजी देसाई
न्यू भारत प्रिंटिंग प्रेस,
गिरगांव, मुंबई नं. ४.

FOREWORD.

All the stories contained in this book were orginally written in English, three of which have already been published in an English Journal. The object of my translating them into Sanskrit was twofold. Firstly to popularise the ancient language which has undoubtedly a greater vocabulary and other wherewithals of expression than any living language. Secondly, I was impelled by the desire of presenting short stories with modern technique in this language. Oceans of fables and tales have been written in Sanskrit, but none of them fulfil the requirements of a modern short story, namely, one main incident, one or two predominating characters, minor incidents culminating in a climax, suspense and finally the denouement. The last of these essentials being arrived at, the story must end.

The stories in this book have been written in the Anustup metre which lends itself most admirably to this form of narration.

Kshama Row.

कथापञ्चकनिर्माणे
ययाऽहं प्रेरिताऽभवम् ।
तस्यै मदीयवत्सायै
लीलायै ग्रन्थमर्पये ॥

क्षमा राव

॥ श्री ॥

कथापञ्चकम् ।

बालिकोद्वाहसङ्कटम् ।

बभूव पार्वती नाम कुलीना गतभर्तृका ।
दास्यकर्म प्रकुर्वाणा देवरस्य निकेतने ॥ १ ॥
मृते भर्तरि सा नूनं भविष्यत्येव किङ्करी ।
इत्यभाषि पुरा लोकैर्धुल्लिकापुरवासिभिः ॥ २ ॥
यतः प्रभृति संप्राप्ता भर्तृबन्धुजनालयम् ।
ततः कर्मकरीभूय स्थिता सा दीनभावतः ॥ ३ ॥
एवं वर्षेषु गच्छत्सु हीयमानशुभाकृतिः ।
प्रनष्टहृदयोत्साहा निराशा च बभूव सा ॥ ४ ॥

अतिबाल्यदशायां सा गुरुभिः पर्यणाय्यत ।
शारदीयविधानात्पाग् बाल्योद्वाहनिरोधकात् ॥ ५ ॥
अनुष्ठिते विवाहे च पितरौ पञ्चतां गतौ ।
सुतामेकाकिनीं मुक्त्वा बालपत्यनुषङ्गिणीम् ॥ ६ ॥
आचिराद् बालभर्तापि पार्वत्याः पितरौ दिवम् ।
अन्वगादविदम्भेव विवाहोत्तरगौरवम् ॥ ७ ॥
अथ किं पितृवात्सल्यं जानीयाद्बालिकैव सा ।
किं स्मरेद्वा स्वभर्तारमचिरातीतबाल्यकम् ॥ ८ ॥
काले प्रौढं वयः प्राप्ता बन्धुभिः सा विरूपिता ।
कलयद्भिः कुलस्त्रीणां यौवनं विपदावहम् ॥ ९ ॥
केशलुञ्चनकाले तामीक्षित्वा साश्रुगद्गदाम् ।
केशपाशो वितन्तूनां नाशकारीति तेऽब्रुवन् ॥ १० ॥
केशपाशविहीनापि न लावण्याद्व्यपुज्यत ।
को वा निसर्गसौन्दर्यं यौवनं च विलोपयेत् ॥ ११ ॥

श्वेतवासाः सुशीर्षा सा सुकुमारा च मोहिनी ।
येशुक्रिस्तस्य मातेव विरेजे मधुराकृतिः ॥ १२ ॥
ऊनविंशतिवर्षापि मयस्यन्ती दिवानिशम् ।
आहरन्ती जलं कूपाद् धावन्ती वस्त्रसञ्चयम् ॥ १३ ॥
रक्षन्ती गोमहिष्यादीन् पचन्ती पाकमन्दिरे ।
परार्थे परिशश्राम मूर्तिः क्लेशमयीव सा ॥ १४ ॥
दासीत्वशृङ्खलां गुर्वीं दधत्याः प्रतिवासरम् ।
क्षणमात्रमभूत्तस्या विश्रान्तिर्घटपूरणे ॥ १५ ॥
जलं कूपात्समुद्धृत्य वहन्ती शिरसा घटम् ।
श्रामं श्रामं निजावासं प्रत्यगान्मन्दभागिनी ॥ १६ ॥
अनिशं कर्मकुर्वत्या वत्सलो देवरात्मजः ।
अव्याजमधुरालापी बभूवैकावलम्बनम् ॥ १७ ॥
विनोदयितुमात्मानं क्रीडन्ती शिशुना तु सा ।
निषिध्यते स्म नैर्घृण्याद्वान्धवैः पत्युरात्मनः ॥ १८ ॥

श्री
व
नव

भोजनं परिवेष्याथ क्षालयित्वा च भाजनम् ।
अन्तः पुरस्य कोणे सा निषीदति तमोमये ॥ १९ ॥

अन्नशेषमतिश्रान्ता भोक्तुमुत्साहवर्जिता ।
तूष्णीमास्ते विषीदन्ती कर्कशैर्बन्धुशापितैः ॥ २० ॥

अन्नस्यार्धं शुने दत्ते चरते गोष्ठसंनिधौ ।
स चोपातिष्ठते नित्यमाहाराय तदन्तिके ॥ २१ ॥

ततो मध्यनिशायां सा शनकैरुपसर्पति ।
कोणमेकं बहिर्गेहे तिमिरं जालकञ्चरम् ॥ २२ ॥

प्रत्यस्थिवेदनां गुर्वीं सहमाना तपस्विनी ।
निराशंया परिग्रस्ता निद्रातुं नैव शक्यति ॥ २३ ॥

अथ श्रमेण सुप्तापि प्रबुद्धा सहसा भवेत् ।
क्रुद्धान् स्वप्नेऽपि पश्यन्ती बन्धूनाक्रोशनिष्ठुरान् ॥ २४ ॥

जाग्रती च तदन्वास्ते शृण्वती वायुमुत्कृतिम् ।
गवां वालधिशब्दं च निकटास्थितगोष्ठकात् ॥ २५ ॥

बालिकोद्वाहसङ्कटम् ।

दैवरं चिन्तयन्ती सा महासानन्दकारकम् ।
आत्मानं सान्त्वयन्ती च निद्राति कथमप्यहो ॥ २६ ॥

सूर्योदये गवां दीना हम्बया सा प्रबोधिता ।
दोहनाय घटीहस्ता गोष्ठकं याति सत्वरम् ॥ २७ ॥

एवं वर्षेषु गच्छत्सु युवा कश्चिदगाहत ।
तस्या हृदयमेकान्तं सूर्यांशुरिव गह्वरम् ॥ २८ ॥

एकाकिन्यास्तदीयं च चेतसा स्वप्नभूपतिः ।
मृग्यज्ञान्तरसौन्दर्यं लौकिकानामगोचरम् ॥ २९ ॥

मलिनेऽपि स्थले तस्मिन् स प्रवासी व्यलम्बत ।
प्रियां साक्षादिवा पश्यन् रात्रौ तु स्वप्नदृष्टितः ॥ ३० ॥

चिराय वक्तुकामोऽपि नोपैतुं धैर्यमाप सः ।
यावद्दैवविपाकेन कालः स्वयमुपानमत् ॥ ३१ ॥

तथा हि सा गता कूपमेकाकिन्येव जातुचित् ।
निवर्तितुं गृहं शीघ्रमुत्सुकाऽभूद्विलम्बिनी ॥ ३२ ॥

तदा सार्वजनीनस्य समीपे कूपकस्य सा ।
दृष्ट्वा दृष्टिपथेनैव यूनो हृदयमाविशत् ॥ ३३ ॥
अनेकवनितामध्यादेका सैव चकर्ष तम् ।
विधवापि मनोहर्त्री सौलक्षण्यविशेषतः ॥ ३४ ॥
तस्या अपूर्वलावण्यमाननाब्जं विलोकयन् ।
चिन्तामुद्रितनेत्रे च युवा तस्थौ विमोहितः ॥ ३५ ॥
उग्रैः कटाक्षपातैस्तामपश्यन् योषितः सदा ।
सूचयन्त्यः परं द्वेषं विधवेति च लाघवम् ॥ ३६ ॥
सर्वमेततत्परीक्ष्यासौ विस्मितोऽभुद्युवा भृशम् ।
विधवानां हि दीनत्वं ज्ञातपूर्वं न साधुना ॥ ३७ ॥
दुरवस्था लघुग्रामे वितन्तुतरुणीजनैः ।
या नित्यमनुभूयन्ते नालं वर्णयितुं हि ताः ॥ ३८ ॥
तथा हि धुल्लिकापल्यामन्धा अज्ञानधूलिभिः ।
धर्माधर्मौ न चापश्यन् कृपणास्तन्निवासिनः ॥ ३९ ॥

तदीया च मनोवृत्तिः परं सङ्कुचिताऽभवत् ।
तस्मिन्मलीमसे ग्रामे वीथिकासंहतिर्यथा ॥ ४० ॥
कूपादुदकमुद्धृत्य घटं धृत्वा च संभृतम् ।
जवात्प्रतिष्ठमानायाः पार्वत्याः पदमस्खलत् ॥ ४१ ॥
पदे च स्खलिते सापि पपात सहसा भुवि ।
पङ्किलायां घटश्चापि भ्रंशित्वा रिक्ततामगात् ॥ ४२ ॥
पतितां वल्लभां दृष्ट्वा साहाय्यं कर्तुमुत्सुकः ।
स तूर्णमभिदुद्राव पार्वत्याः सविधं युवा ॥ ४३ ॥
शनैरुत्थाप्य तां मह्वस्तदनुज्ञामयाचत ।
घटेन स्वयमुद्धर्तुं पानीयं कूपतः पुनः ॥ ४४ ॥
मार्दवं वचसस्तस्य लोकोत्तरमलक्ष्यत ।
आजन्मतस्तयान्येभ्यो न श्रुतं हि वचः प्रियम् ॥ ४५ ॥
तेन व्यतिकरेणैषा विशेषेण चमत्कृता ।
अचिन्तयदिदं कूटं प्रयुक्तं किमु बान्धवैः ॥ ४६ ॥

श्रां. अर्घमार्गे घटं नेतुं याचमानं निवार्य तम् ।

व्यव मा तावदहमवेदं नेष्यामीति जगाद सा ॥ ४७ ॥

नवाब

स्वनैसर्गिकबुध्यैव युवा तच्चित्तमग्रहीत् ।

तस्या हि दीनसंलापस्तत्कथां समसूचयत् ॥ ४८ ॥

ततः प्रभृत्युभावेतौ मिलतः स्म दिने दिने ।

गतास्वन्यासु नारीषु विविक्ते कूपसंनिधौ ॥ ४९ ॥

क्लेशांस्तज्जीवयात्राया बन्धूनां च नृशंसताम् ।

तर्कयञ्चिरात्सोऽपि दुःखितोऽभूद्भृशम् ॥ ५० ॥

सानुकम्पोऽथ पार्वत्यां यथा क्षतमृगीं प्रति ।

चुक्रोध पीडकेभ्योऽसौ लुब्धकेभ्य इवोत्कटम् ॥ ५१ ॥

मृदूक्तिरनुकम्पा च सौजन्यं चात्मगौरवम् ।

सरलश्च तदाचारस्तस्यां विश्वासमादधुः ॥ ५२ ॥

स जातु पार्वतीमाह सजीवा गृहिणी प्रिया ।

अदाहि मे पुरा दैवादहो दुःखं चिराय मे ॥ ५३ ॥

तदाकर्ण्य च सा शोकमुद्भतैरश्रुबिन्दुभिः ।
व्यञ्जयन्ती बभूवास्य भूयसा प्रेमभाजनम् ॥ ५४ ॥
अचिरादेव सौहार्दं तथा वृद्धिमगात्तयोः ।
क्षणं च मिलितौ दृष्ट्या यथानन्दमयौ स्थितौ ॥ ५५ ॥
पराजितमृगीवासौ तस्मिन् भक्तिपराभवत् ।
अपश्यत्स च तां नित्यमादरेण गरीयसा ॥ ५६ ॥
बभूवान्याद्दशीवासौ सुखानुगतमानसा ।
प्रफुल्लवदने तस्या दृश्यते स्म महत्सुखम् ॥ ५७ ॥
पुरा तदानने लक्ष्यं यद्दैन्यं चिरदुःखजम् ।
तदद्यविलयं यातं रूपं चाभूत्समुज्ज्वलम् ॥ ५८ ॥
रूपान्तरमिवापन्नं मुखं वीक्ष्यापि बान्धवाः ।
पूर्ववत्तामनादृत्य कारणं न व्यचिन्तयन् ॥ ५९ ॥
तस्य देवीव भाति स्म विकृतापि मनागसौ ।
सुकेशी यदि भूयः स्यात्तदा निरुपमा भवेत् ॥ ६० ॥

कथापञ्चकम् ।

इति ध्यायन् कदाचित्स प्रियायास्तया सह ।
स्थलान्तरं जगादैनां गुप्तं निजमनोगतम् ॥ ६१ ॥

तन्निशम्य सुहृद्वाक्यं सहसाभूच्चमत्कृता ।
अकम्पत च सा ऋज्वी रोमाञ्चितकलेवरा ॥ ६२ ॥
अथ चिन्ताकुलां दृष्टिमवार्यक्लेशदर्शिनीम् ।
तस्या विलोक्य तां प्राह सान्त्वयन्मधुरोक्तिभिः ॥ ६३ ॥
इतो गन्तव्यमावाभ्यां नन्तु नागरिकं पुरम् ।
मा भैषीः परिणेष्यामि धर्मतस्त्वां प्रियेऽचिरात् ॥ ६४ ॥
कम्पमाना च साऽपश्यद्भाविनीं सुखदीपिकाम् ।
प्रज्वलन्तीं मनोदृष्ट्या ज्वालामिव महावने ॥ ६५ ॥
तमः क्लेशमयं सर्वं सहसाऽलीयत क्षणात् ।
क्षणान्तरे तु बन्धूनां स्मृतिर्भयमजीजनत् ॥ ६६ ॥
मैवं मैवं न शक्यं तत्परतन्त्रास्मि बन्धुभिः ।
इति नम्रमुखी प्राह बाष्पगद्गदिताक्षरा ॥ ६७ ॥

अलं भयेन ते भीरु प्रच्छन्नं ननु गम्यते ।
न गतिर्ज्ञास्यते लोकैरित्याह स करं स्पृशन् ॥ ६८ ॥
सबाष्पनयना सापि स्थितानाथा स्मिताननना ।
गाढानुरागमव्यक्तं सूचयन्ती कटाक्षतः ॥ ६९ ॥
कम्पमानाधरां भीरुं दृष्ट्वा तदनुमोदनम् ।
प्राप्तं मयेति निश्चित्य प्रहृष्टोऽभूद्युवा च सः ॥ ७० ॥
अचिरादपसर्पन्तीं सम्भ्रमानन्दतुन्दिलाम् ।
नेत्राभ्यामनिमेषाभ्यां पिबन्निव युवा स्थितः ॥ ७१ ॥
यथापुरमथान्येद्युः सायं तौ मिलितावुभौ ।
अलक्षितौ प्रतस्थाते जवात्पुण्यपुरीं प्रति ॥ ७२ ॥
नगरीमथ सम्प्राप्य स्थापयित्वा क्वचित्प्रियाम् ।
अन्वेषितुं युवा यातः पुरे कञ्चित्पुरोधसम् ॥ ७३ ॥
ज्ञात्वा नामानि विप्राणां दारकर्मोपजीविनाम् ।
अटन्नपि दिनं कृत्स्नं नैव लेभे पुरोहितम् ॥ ७४ ॥

अथ युवा विप्रानुवाच

विधवां तरुणीमेकां वोढुमिच्छामि धर्मतः ।
अतो वः प्रार्थये विप्राः कार्यतां दारकर्म नौ ॥ ७५ ॥

ईदृशेन विवाहेन धर्मलोपो भाविष्यति ।
न हि तं कारयिष्यामो गम्यतामिति तेऽब्रुवन् ॥ ७६ ॥

तावुद्वाहयितुं केचित् प्रतिपन्ना द्विजातयः ।
सवर्णभिन्नतां ज्ञात्वा प्रत्याचख्युस्तदर्थनाम् ॥ ७७ ॥

ब्राह्मणावपि भिन्नौ स्थः सुतरां वर्गतो युवाम् ।
संयोगो वामधर्म्यः स्यादित्याहुः किल ते द्विजाः ॥ ७८ ॥

अतर्कितान्तरायोऽसौ लौकिकज्ञानवर्जितः ।
ययौ विषण्णसंभ्रान्तः पर्यन्ते न्यायवादिनम् ॥ ७९ ॥

लेखपत्रेण साध्योऽयं विवाहो युवयोः सखे ।
निगूढ निजहिन्दुत्वमिति सोऽपि न्यवेदयत् ॥ ८० ॥

प्रियां हि वोढुकामोऽहं धर्मान्तरमपि श्रये ।
स एव सुलभोपाय इति चाह युवाऽऽस्थया ॥ ८१ ॥
मनोराज्यसुखं ध्यायन्नाशया हृष्टमानसः ।
जगाम सत्वरं यत्र सोत्सुका प्रेयसी स्थिता ॥ ८२ ॥
विवाहः क्षणमात्रेण भविष्यति किलावयोः ।
पुरोऽधिकारिणो नाम लिखित्वेति जगाद ताम् ॥ ८३ ॥
विवाहो न कदाप्येव श्रुतपूर्वस्तयेदृशः ।
तद्विस्मिता च सम्भ्रान्ता पप्रच्छ प्रियमात्मनः ॥ ८४ ॥
विधवार्थं विवाहोऽयं विहितः किं विशेषतः ।
वद वल्लभ तन्मह्यं प्रार्थये परिविह्वला ॥ ८५ ॥
कल्पितो धर्मसिध्यर्थं संयोगस्य सवर्णयोः ।
विधिरेष विधानज्ञैरित्यवोचत स प्रियाम् ॥ ८६ ॥
कस्तत्र ननु लेख्योऽर्थ इति पप्रच्छ कातरा ।
प्रेक्षमाणा युवानं तं कम्पमाना च संभ्रमात् ॥ ८७ ॥

निगूहयं तत्र हिन्दुत्वं न तत्कष्टं मनागपि ।
कार्यं हि तद्विधानोक्तमित्यस्पष्टमुवाच सः ॥ ८८ ॥
नावां भ्रष्टौ भविष्यावो मा बिभीहि प्रिये ततः ।
रक्ष्यते हि द्विजातित्वमिति कान्तां समादधे ॥ ८९ ॥
धुल्लिग्रामैकवासित्वादद्दष्टविषयान्तरा ।
उवाच कम्पमाना सा सम्भ्रमस्खलिताक्षरम् ॥ ९० ॥
प्रतिभाति विवाहोऽयं वार्धुषैर्लेख्यपत्रवत् ।
स्वजातीयैर्बहिष्काराद्बिभेमि खलु वल्लभ ॥ ९१ ॥
ननु प्रिये त्वमाबाल्यात्सर्वलोकैस्तिरस्कृता ।
अलीकमेव तैर्मूर्खैः कृतामित्यवदत्प्रियाम् ॥ ९२ ॥
प्रायश्चित्तेन पूतः सन् स्वजात्या योज्यते द्विजः ।
नो चेद्बहिष्कृतस्तिष्ठेद्यावज्जीवं तिरस्कृतः ॥ ९३ ॥
इति नः पूर्वजैर्वृद्धैर्व्यवहारविचक्षणैः ।
आबाल्यादनुशिष्टाः स्मो बहिष्काराद्बिभेम्यतः ॥ ९४ ॥

गच्छेयमपि लोकान्ते भवत्सहचरी यदि ।
कथं रक्षेयमात्मानं बहिष्काराच्तु जातितः ॥ ९५ ॥
अलमात्मानमुद्वेज्य कातर्यं भीरु मुच्यताम् ।
इति तां सान्त्वयामास चिन्तावात्याभिराहताम् ॥ ९६ ॥
सबाष्पा दीनदीना च प्रेक्षमाणा स्ववल्लभम् ।
सा ततः साशिरःकम्पं विललाप सगद्गदम् ॥ ९७ ॥
प्राप्तामितसुखायाश्च प्रतिकूलो विधिर्मम ।
नोत्सहे संमतिं दातुं मित्र मे क्षम्यतामिति ॥ ९८ ॥
ततस्तामनुनेतुं स प्रायतिष्ट युवा मुहुः ।
प्रोत्साहितापि सा भूयः साशङ्कैव पुनः स्थिता ॥ ९९ ॥
वस प्रिये मया साकं धर्मपत्नीव मानिता ।
सर्वदा त्वाभिरक्षेयमित्ययाचत वल्लभाम् ॥ १०० ॥
क्षणमात्रमातिष्ठत्सा सचिन्ता च निरुत्तरा ।
दोलायते स्म तच्चित्तं द्वयोर्मध्ये विमर्शयोः ॥ १०१ ॥

अन्योन्यप्रेमसर्वस्वौ भविष्यावो निरन्तरम् ।
वेदिष्यति न कोप्यावां यदेकान्ते वसाम्यहम् ॥ १०२ ॥
ऋते कर्मकरेभ्यो मे जनान् क्षेत्राद्बहिर्मम ।
न पश्यामि कदापीति व्याकुलां तां समाश्वसीत् ॥ १०३
दीर्घं निश्वस्य दुःखार्ता कम्पयन्ती शिरः पुनः ।
निरुत्तरा चिरं तस्थौ दैवोपहतचेष्टिता ॥ १०४ ॥
वल्लभं प्रेक्षमाणाथ चलदोष्ठपुटाभवत् ।
यत्किञ्चिद्वक्तुकामेव तत्तु कण्ठे व्यलीयत ॥ १०५ ॥
अथ सा दुःखमात्राय संगमोऽयं भविष्यति ।
इति स्वभावतो ज्ञात्वा न्यग्रहीत्स्वमनः प्रियात् ॥ १०६ ॥
नाहमिच्छामि नेतुं त्वामात्मना सह दुर्गतिम् ।
मत्कृते न त्वया त्याज्यः स्वार्थ इत्यब्रवीच्च सा ॥ १०७ ॥
व्यक्तीकृतं द्वयं तस्मै वचसा दृढनिश्चयः ।
स्मितेन कृत्रिमेणापि स्वदुःखस्य च चण्डता ॥ १०८ ॥

अम्भोदकमुपाहर्तुं निर्जगाम युवा ततः ।
आनीय च द्वयं शीघ्रं प्रियाया निदधे पुरः ॥ १०९ ॥

अल्पमात्रमसेवेतामाहारं चिन्तयाकुलौ ।
प्रकृत्यैव मितालापा सा पुनर्मौनमाश्रयत् ॥ ११० ॥

अनुमोदिष्यते योगं प्रियेत्याशंसया स्थितः ।
नान्तरा निर्बबन्धैनामालापेन युवा क्षणम् ॥ १११ ॥

सा तु लक्षीकरोति स्म चेतसा धुल्लिपल्लिकाम् ।
आत्मनः किङ्करीभावं बन्धूनां च नृशंसताम् ॥ ११२ ॥

एक एव ममालम्बो देवरस्य कुमारकः ।
सैष बाल्यमतिक्रम्य सादरो मयि वर्त्स्यति ॥ ११३ ॥

अद्यापि मयि बालोऽयमास्ते परमवत्सलः ।
क्रमात्प्रौढं वयः प्राप्तो भूयः प्रीतिं करिष्यति ॥ ११४ ॥

इत्यात्मनैव चात्मानं सान्त्वयन्ती मनोरथैः ।
सर्वदुःखानि सोढुं सा चकार दृढनिश्चयम् ॥ ११५ ॥

अथ यूना निजग्रामं प्रियां नेतुं कृतोऽन्तिमः ।
प्रयत्नः परमोदारः सोऽपि जातो निरर्थकः ॥ ११६ ॥

मैवं मैवमिति प्राह सबाष्पा सा कृताञ्जलिः ।
अपृष्ट्वैव च तत्स्थानं निर्जगाम प्रणम्य तम् ॥ ११७ ॥

दिनात्यये परेद्युश्च प्राप सा धुल्लिपल्लिकाम् ।
परिक्लान्ता क्षुधार्ता च विमनाश्च वियोगतः ॥ ११८ ॥

देवरस्य गृहं यान्ती व्यतिचक्राम साऽध्वनि ।
कूपं यत्राचिरायन्त काश्चिन्नार्योऽतिजल्पिकाः ॥ ११९ ॥

आलोक्य पार्वतीं यान्तीं प्रवासमलिनाम्बराम् ।
उच्चैराक्रन्दमानास्ता ग्राम्यजल्पैरपाहसन् ॥ १२० ॥

नारीरुपेक्ष्य निर्लज्जाः सत्वरं सा यदाऽव्रजत् ।
जहसुस्तास्तदात्युच्चैरुद्वेजायितुमेव ताम् ॥ १२१ ॥

प्रतिकूलप्रवातेन प्रहता मन्दभागिनी ।
अधोमुखी प्रदोषे सा प्राप देवरमन्दिरम् ॥ १२२ ॥

गृहस्य प्राङ्गणं लिप्तं तमसेव बभौ तदा ।
निश्शब्दं विजनं चासीत्तद्द्वयौ साऽपराङ्गणम् ॥ १२३ ॥
गोष्ठद्वारमपावृत्य पश्यन्तीमथ गोव्रजः ।
तृणशय्यासु विश्रान्तः साभिज्ञं तामलोकयत् ॥ १२४ ॥
शुनकः स्वैरचारी यः प्राप्नोति स्मान्वहं गृहम् ।
उपागच्छत्परायातां लेढुमस्याः करं कृशम् ॥ १२५ ॥
शीर्षे हस्तपरामर्शैर्लालयन्तीं विलोकयन् ।
शुनकः सदयो मौनी सँल्लापमकरोदिव ॥ १२६ ॥
नयने तस्य पश्यन्त्याः सबाष्पे प्रेमसम्प्लुते ।
स्वात्मानुकम्पया तस्या हृदयं नु व्यलीयत ॥ १२७ ॥
अथ सा शुनकं भक्तमुवाच स्वानुयायिनम् ।
अन्नं दास्यामि तिष्ठेति स च श्रुत्वा तथा स्थितः ॥ १२८ ॥
वेदिसोपानमारूढाऽपश्यदर्धमकाशितम् ।
महानसनिविष्टेन लघुदीपेन तद्गृहम् ॥ १२९ ॥

कथापञ्चकम् ।

पदशब्दं निशम्याऽऽगाद्बहिः शीघ्रं प्रधावितः ।
हर्षनिर्भरमुग्धास्यः प्लवन् देवरपुत्रकः ॥ १३० ॥
यावत्स बालको धावन्नातिचक्राम देहलीम् ।
रुरुधेऽस्य गतिस्तावत्कर्कशध्वनिनान्तरात् ॥ १३१ ॥
स्निग्धपाणिः कुमारोऽयं मुखसंलग्नसिक्थकः ।
प्रेमामृताप्लुतैर्जल्पैराह्वयन् पार्वतीं स्थितः ॥ १३२ ॥
प्रासारयत्करौ यावत्सबाष्पा साऽर्भकं प्रति ।
तावत्तस्याऽऽययौ माता क्रोधवक्रीकृताननना ॥ १३३ ॥
आगतासि किमत्र त्वं कुलं दूषयितुं पुनः ।
इति चोक्ष्यमाना सा पार्वतीं निरभर्त्सयत् ॥ १३४ ॥
अलीकेनापवादेन जातामर्षापि पार्वती ।
वज्राहतेव संस्तब्धा विवर्णा च बभूव सा ॥ १३५ ॥
तीव्रयातनया मृत्योराविष्टेव क्षणं स्थिता ।
ततो नतमुखी पश्चात्पदद्वयमपासरत् ॥ १३६ ॥

तावच्च बालकः प्रोच्चैः पार्वतीं पुनराह्वयत् ।
स्तब्धा च सा क्षणं बाले बद्धदृष्टिरवस्थिता ॥ १३७ ॥
देहि मातुलि मे भोज्यमिति म्लिष्टमुवाच सः ।
करौ प्रसार्य सस्नेहं पार्वतीं प्रति बालकः ॥ १३८ ॥
उपसर्पति तद्बाले पुनराशाङ्कुरो हृदि ।
प्ररूढः सहसा तस्या भाविकल्याणसूचकः ॥ १३९ ॥
यावन्न बालकोऽसर्पत्सोत्सुकः पदमेककम् ।
तावत्कङ्कणभाराढ्यः पाणिरेको रुरोध तम् ॥ १४० ॥
मा स्म गच्छान्तिकं तस्या अस्पृश्या सा हि बालक ।
इति चुक्रोश मातास्य कर्षन्ती दारकं बलात् ॥ १४१ ॥
निराशया स्थितः खिन्नो दर्शं दर्शं स विस्मितः ।
अस्पृश्या सा कथं जाता भवेदिति विचिन्तयन् ॥१४२॥
शोकावेगेन संस्तब्धा क्षणमस्थात्तपस्विनी ।
आनाथ्यभावनोद्विग्ना निष्कासितशुनी यथा ॥ १४३ ॥

दुःखभारेण सीदन्ती कम्पमानकलेवरा ।
संधारयितुमात्मानमिवासीत्स्वस्तिकस्तनी ॥ १४४ ॥
अवारोहत्ततो दीना वेदिसोपानतः शनैः ।
अङ्गणाच्च विनिष्क्रम्य तमिस्रायामगाहत ॥ १४५ ॥
शुनको यश्चिरायैनामवतस्थेऽनुपालयन् ।
क्षुधार्तोऽपि स्वयं भक्तः सोऽन्वयासीदकिञ्चनाम् ॥१४६॥

पुष्पिका—" द्वेषेऽपि भ्राजते प्रेमा "

इति क्षमायाः कृतिषु लोकवृत्ताख्यानमालायां कथापञ्चके बालिकोद्वाह-सङ्कटं नाम कथा समाप्ता ।

गिरिजायाः प्रतिज्ञा

उवास गिरिजा नाम वृद्धा काचित्कुलाङ्गना ।
कस्मिंश्चिदुटजे पूर्वं गिरिकन्दरसंश्रये ॥ १ ॥
लीलनामकपल्ल्यन्ते पुण्यपुर्याः समीपतः ।
कन्दराग्रे कुटीरं तत् सन्निविष्टमभूद्दृढं ॥ २ ॥
कदाचिच्छिशिरे काले विलम्बितदिवाकरे ।
प्रत्युषास्तिमिरं मग्ना व्यक्ताव्यक्ता दरी बभौ ॥ ३ ॥
न यावत्तिमिरच्छाया गता निरवशेषतः ।
अदर्शि तावदुद्द्योतः शनैर्दूराद्विसृत्वरः ॥ ४ ॥
ततः शनैरुदैज्ज्योतिर्मण्डलं घनमध्यतः ।
नीहारपटलच्छन्नां हरितां दीपयद्दरीम् ॥ ५ ॥
बोधितापि महत्येव प्रत्यूषे पक्षिकूजितैः ।
चिराय शयनीयस्था नयने नोदमीलयत् ॥ ६ ॥

सूर्यांशुरतिसूक्ष्मोऽपि प्रविशन् भित्तिरन्ध्रतः ।
अलमासीदपाकर्तुं शय्यागृहगतं तमः ॥ ७ ॥
अपास्य काम्बलं वासः सामिवारितजृम्भिका ।
मुक्त्वा च शयनं शीघ्रं गवाक्षद्वारमभ्यगात् ॥ ८ ॥
क्षणद्वयमतिष्ठत्सा मन्दमारुतसेविनी ।
प्रेक्षमाणोदयं भानोः प्रत्याशापूर्णमानसा ॥ ९ ॥
वैधव्यस्य महाक्लेशान् प्राप्ता यौवन एव सा ।
पश्चात्पुत्रवधार्ता च प्रतीकारपराभवत् ॥ १० ॥
द्वेषेण कथ्यमाना सा प्रतिज्ञामकरोद्दृढाम् ।
यत्सिद्धिमभिकाङ्क्षन्ती ध्रियते स्माब्दविंशतिम् ॥ ११ ॥
स द्वेषो वत्सरैरेभिर्वृद्धिमेत्य महोत्कटः ।
नवं नवमकार्षीच्च जीर्यन्त्या अपि जीवितम् ॥ १२ ॥
प्रतिज्ञासिद्धिमीप्सन्त्या वैरनिर्यातनं प्रति ।
शोकावेगमयी तस्या आसीत्सह्या हि दुःस्थितिः ॥ १३ ॥

मध्यं वयो व्यतीतापि चटुलाङ्गी पटीयसी ।
अतिशेते स्म चापल्यं तरुण्या अपि साऽनिशम् ॥ १४ ॥
उभता स्त्यानदीर्घा च नताङ्गी वेतसोपमा ।
कृशहस्तापि कार्येषु कृतहस्ता बभूव सा ॥ १५ ॥
नासीत्तन्मुखमुद्रायां विशेषेण विचित्रकम् ।
किन्तु सङ्कुचिते आस्तामक्षिणी तीक्ष्णदर्शिनी ॥ १६ ॥
सूचयामासतुः स्पष्टं नेत्रे कारुण्यवर्षिणी ।
कथामेकान्तवासस्य प्रतिज्ञायाश्च दारुणाम् ॥ १७ ॥
ईषत्तु विवृते तस्या निलिल्ये दन्तुरे मुखे ।
छाया नैसर्गिकप्रीतेरव्याजोपकृतेस्तथा ॥ १८ ॥
सामान्यतस्त्वसूच्यन्त तदीयमुखलक्षणात् ।
कार्येषु शुद्धसङ्कल्पः सत्यं चात्मविनिग्रहः ॥ १९ ॥
सुस्वप्नदर्शिनी जातु प्रबुद्धा मुदितान्तरा ।
कोकिलेव प्रगायन्ती दिनचर्यामचीकरत् सा ॥ २० ॥

आहरन्ती जलं कूपात् सिञ्चन्ती माङ्गणद्रुमान् ।
कक्षानुन्मूलयन्ती च वृक्षवाट्यां पराङ्गणे ॥ २१ ॥
पचन्ती मितमाहारं नातिमृष्टं महानसे ।
गायन्ती दोलिकागीतिं मधुरामन्तरान्तरा ॥ २२ ॥
विविक्तवासनिर्वेदं क्लेशानां च परम्पराम् ।
अशेषमेव विस्मृत्य परिहृष्टा व्यवाहरत् ॥ २३ ॥
आकुमारवियोगात्सा स्थिता निर्विण्णमानसा ।
सुमृष्टान्नं परित्यज्य प्रियं पुत्रस्य यत्पुरा ॥ २४ ॥
समाप्तभोजना साथ कार्यशेषोद्यताऽभवत् ।
घटस्थाल्यादि पात्राणि मार्जयन्ती गृहाद्बहिः ॥ २५ ॥
गोमयेनोपलिम्पन्ती भूतलं पूर्वशोधितम् ।
उद्धरन्ती जलं कूपान्निशायां पाकसिद्धये ॥ २६ ॥
निर्वृत्तगृहकार्या सा परिश्रान्ता विशेषतः ।
निद्रासुखमभीप्सन्ती शयनीयमसेवत ॥ २७ ॥

शयिता ह्यस्वपर्यङ्के सा मनस्युदलेखयत् ।
स्वजीवितस्य चित्राणि दुःखदस्यानुपूर्वशः ॥ २८ ॥
उद्भवं निजपुत्रस्य बाल्यावस्थां च तादृशीम् ।
अल्पावधिं च कौमारं निधनं च तथाविधम् ॥ २९ ॥
यावद्ध्यायति पुत्रस्य प्रेतकायं गृहागतम् ।
तावद्दुःखव्रणं तस्या हृदये नवतामगात् ॥ ३० ॥
नानाविचित्रसङ्कल्पैरभवज्जाटिलं मनः ।
स्मरणं चातिवृत्तानामगमच्च सुतीव्रताम् ॥ ३१ ॥
शयितार्धघटीमात्रं शुश्राव सहसा समम् ।
शृङ्खलाया झणत्कारं पादाघातस्य च ध्वनिम् ॥ ३२ ॥
कुटीरस्य बहिर्द्वारमथोद्घाट्य बलाद् विशन् ।
कश्चिद्धून्दी परिश्रान्तो निश्वसन्नपतद्भुवि ॥ ३३ ॥
यावदाश्चर्यविष्टब्धा गिरिजोत्थाय पश्यति ।
तावदागन्तुकः क्रन्दन् भीतभीतो जगाद ताम् ॥ ३४ ॥

अम्ब गोपाय मां क्वापि संवृते शरणागतम् ।
इति ब्रुवन्नुपासर्पच्छृङ्खलाभारपीडितः ॥ ३५ ॥
कुत्र त्वां भद्र गूहेयमिदमल्पं हि मे गृहम् ।
इति साऽभिमुखीभूय सकम्पा तमवोचत ॥ ३६ ॥
मैवं हा न विलम्बस्व मातरायान्ति ते क्षणात् ।
इत्युवाच स्खलद्वाचा कोष्ठागारं निरूपयन् ॥ ३७ ॥
केऽन्वायान्तीति पृष्टोऽसौ तां जगाद स सम्भ्रमात् ।
क्रूरास्ते बन्दिपाला मे प्राणाः संशयिता अहो ॥ ३८ ॥
बद्धदृष्ट्याभिपश्यन्तीं साशङ्कामिव तां विदन् ।
वराकश्चकितः प्राह दीनभावेन सत्वरम् ॥ ३९ ॥
दशवर्षाणि कारायां मया क्लेशा महत्तराः ।
असह्यन्त दिवारात्रमधर्मैः सह बन्दिभिः ॥ ४० ॥
संप्राप्यावसरं मातरात्मानमपवाह्य च ।
सशृङ्खलं प्रधावन्तं रक्षिणो मामनुद्रुताः ॥ ४१ ॥

बन्दिनो वचनं श्रुत्वा दयाविष्टा बभूव सा ।
चिन्तयन्ती क्षणं तस्थौ भूतलन्यस्तलोचना ॥ ४२ ॥

अम्ब स्थापय मां गूढं न क्षिपेः क्षणमप्यहो ।
गोष्ठे वा पाकशालायामुपरिक्रोडकेऽपि वा ॥ ४३ ॥

इत्युवाच वराकोऽयमङ्गुल्या तत्प्रदर्शयन् ।
क्रोडकं यद्वितानस्थं साश्वितेन्धनसंश्रयम् ॥ ४४ ॥

चिन्तयन्ती स्थिता यावत्कम्पमानशिराः क्षणम् ।
तावदभावि निर्भेदी दूरात्कलकलध्वनिः ॥ ४५ ॥

रक्ष मामम्ब याचे त्वां न गृह्येय यथा परैः ।
इति सानुनयं बन्दी माह भीतः कृताञ्जलिः ॥ ४६ ॥

गिरिजाथ ददर्शोर्ध्वं सहसा विलसन्मुखी ।
गवाक्षाभिमुखं यान्ती संज्ञया च तमाह्वयत् ॥ ४७ ॥

पश्चिमाङ्गणविस्तारः शय्यागारगवाक्षतः ।
दृश्यते स्म सुविस्पष्टमग्रभागादगोचरः ॥ ४८ ॥

लङ्घयस्व गवाक्षात्त्वमेषास्मि द्रुतमागता ।
इत्युक्त्वा सा बहिर्द्वारमभ्यगच्छत्सुसत्वरम् ॥ ४९ ॥
भीतभीतो वराकोऽसौ वातायनमुपस्थितः ।
स्वपादौ च समाकर्षन्नस्खलत् पश्चिमाङ्गणे ॥ ५० ॥
कम्पमानो बहिर्भित्तिमवलम्ब्य स्थितो युवा ।
आतिथेयीं निरुच्छ्वासमात्मनः प्रतिपालयन् ॥ ५१ ॥
वृद्धा प्रतीक्षमाणा तमचिरात्समुपागमत् ।
कूपके तिष्ठ गूढेऽस्मिन्निति चैनमबोधयत् ॥ ५२ ॥
बन्दी क्षणमिवातिष्ठत्साकूतमवलोकयन् ।
तदीयोक्तेरभिप्रायमजानन्निव कृत्स्नशः ॥ ५३ ॥
अथैनं गिरिजावादीदिहत्वं कुशली भवेः ।
कूपभित्तिगते क्रोडे सुविशाले निगूहितः ॥ ५४ ॥
अथापि चिरयन्तं सा विलोक्य पुनरब्रवीत् ।
पुनः क्षेप्स्यामि ते रज्जुं गतेषु तव शत्रुषु ॥ ५५ ॥

इत्याश्रुत्य घटीयन्त्रे वृद्धा रज्जुमयोजयत् ।
तामवातारयच्चान्तर्यथाग्रं जलमस्पृशत् ॥ ५६ ॥
तावच्च शुश्रुवे दूरात्क्रन्दनस्य प्रतिध्वनिः ।
यमाकर्णयतोऽङ्गानि सीदन्ति स्मेव वन्दिनः ॥ ५७ ॥
अथासीनः महिप्रान्ते घटीयन्त्रस्य पार्श्वतः ।
गृहीत्वा बलवद्रज्जुमात्मानं स न्यपातयत् ॥ ५८ ॥
क्षणादेव युवा प्रापत्कूपिकाभित्तिकोटरम् ।
निगूह्य तत्र चात्मानमवतस्थे सुरक्षितः ॥ ५९ ॥
क्षणं प्रतीक्षमाणा सा शरणागतसुस्थितिम् ।
प्रतीता च महेर्वेगादुच्चकर्ष वराटकम् ॥ ६० ॥
सपद्येव ततो वृद्धा शय्यामेत्य स्थिता क्षणम् ।
सावधाना च निःशब्दा दत्तकर्णा बहिर्ध्वनौ ॥ ६१ ॥
कश्चित्कालं प्रशान्तोऽभूच्छ्रूयमाणः पुरा ध्वनिः ।
सर्वं निःशब्दगम्भीरमभवच्च समन्ततः ॥ ६२ ॥

मार्गान्तरेण किं यातास्ते तस्यानुप्रधावकाः ।
इति ध्यायति यावत्सा पुनरश्रूयत ध्वनिः ॥ ६३ ॥
पदघट्टनशब्दश्च ततोऽश्रावि गृहाद्बहिः ।
ग्रामाधिपश्च तामुच्चैर्नामतः समबोधयत् ॥ ६४ ॥
विश्यतामिति सा द्वारं यावत्तूर्णमपावृणोत् ।
ग्रामेशस्तावदायातः पञ्चभिः सह रक्षिभिः ॥ ६५ ॥
मृग्यते किं नु युष्माभिरितिपृष्टस्तयाब्रवीत् ।
ग्रामणीः किं भवत्यैको पुमान् दृष्टः सगृङ्खलः ॥ ६६ ॥
विस्मयं दर्शयन्तीं तां परिपश्यभुवाच सः ।
निःशङ्कमिह कुत्रापि तिष्ठत्येव स गूहितः ॥ ६७ ॥
नन्वस्ति किमिह स्थानं गृहेऽस्मिन् गूहितुं नरम् ।
इत्यपृच्छत्कठोरं सा ततश्चावेगतोऽब्रवीत् ॥ ६८ ॥
न विश्वसन्ति भद्राश्चेत्सर्वतो मार्गयन्त्विति ।
क्षमामर्थयमानस्तां ग्रामणीरथ सोऽब्रवीत् ॥ ६९ ॥

अविश्वास्या न भद्रे त्वं परतन्त्रास्तु ते वयम् ।
करिष्यामः स्वकर्तव्यं प्रभोराज्ञानुसारतः ॥ ७० ॥
इत्युक्त्वाभिजगामासौ भित्तिकोटरसम्पुटम् ।
मुष्ट्या च तमपाकृष्य तद्द्वारमुदघाटयत् ॥ ७१ ॥
क्षणाच्च ददृशे तत्र क्षेत्रारामार्थसञ्चयः ।
गृहवस्तुचयश्चान्तः पेयभोज्याम्बरादिकः ॥ ७२ ॥
तावच्च पुरुषाः पञ्च प्रचलन्त इतस्ततः ।
अन्तरन्वेषयामासुः प्रतिकोणं प्रयत्नतः ॥ ७३ ॥
अथास्यै दर्शयन्नेकामङ्गुल्या रीतिपेटिकाम् ।
पप्रच्छ ग्रामणीरस्यां ब्रूहि किं तिष्ठतीति नः ॥ ७४ ॥
मदीया पेटिका सेयं भद्र वंशक्रमागता ।
वस्तूनि मम पुत्रस्य विद्यन्ते हि तन्दतरे ॥ ७५ ॥
इत्यवादीदनिच्छन्ती पेटिकोद्घाटनं स्वयम् ।
आकुमारवधात्सा हि स्थापिता तालबन्धिता ॥ ७६ ॥

अन्तःस्थितानि वस्तूनि पवित्राणि विभाव्य सा ।
पेटिकायाः पिधानं तन्न कदाप्युदघाटयत् ॥ ७७ ॥
यदि नोद्घाट्यते पेटी तदा जायेत संशयः ।
इत्यथो विमृशन्ती तामनुक्ताप्युदघाटयत् ॥ ७८ ॥
तस्यामपावृतायां च क्षणादुद्विग्नमानसा ।
पुत्रशोकाकुला भूत्वाऽकम्पतापादमस्तकम् ॥ ७९ ॥
निरुध्य हृदयावेगमुद्धरन्ती पदे पदे ।
वस्तूनि प्रियपुत्रस्य न्यध्वसीत्सा सगद्गदम् ॥ ८० ॥
अलं भद्रे मयासेन प्रतीतोऽस्मि त्वयि ध्रुवम् ।
इति ग्रामाधिपोऽवादीद्दुःखितां परिसान्त्वयन् ॥ ८१ ॥
रक्षिभिः कृतसाहाय्या पञ्चभिः करुणालुभिः ।
तूष्णीमेव पुनः सर्वं पेटके सा न्यवेशयत् ॥ ८२ ॥
कारायाः कथमात्मानं वराकोऽयममोचयत् ।
इति मुख्यमपृच्छत्सा बद्धा तालेन पेटिकाम् ॥ ८३ ॥

द्विवारं प्रतिसप्ताहं वासरन्ध्राद्बहिर्युवा ।
नियुज्यते स्म कार्यार्थं रक्षिकोष्ठस्य संनिधौ ॥ ८४ ॥
युवकेनाधिकारोऽयं प्राप्तः सौशील्यकारणात् ।
इदानीं तु पुनर्बद्धो न भूयस्तमवाप्स्यति ॥ ८५ ॥
उपलभ्य परिश्रान्तं प्रसुप्तं द्वारपालकम् ।
गृहीतावसरो बन्दी कारायाः स पलायितः ॥ ८६ ॥
सर्वथा तं ग्रहीष्याम इति वादिनि नायके ।
बन्दिनं सान्त्वकाम्पिष्ट वचनैः करुणामयैः ॥ ८७ ॥
न तस्य दयसे भद्रे तत्कर्म यदि वेत्स्यसि ।
स ते पुत्रस्य हन्तेति ग्रामणीस्तामवेदयत् ॥ ८८ ॥
निशम्य वचनं वृद्धा तदेतत्पतनोन्मुखी ।
क्षणादशनिविद्धेव तस्थावालम्ब्य पेटिकाम् ॥ ८९ ॥
परमोद्वेगसोत्कम्पा शून्यविष्फारितेक्षणा ।
भीषणभ्रुकुटीबन्धा कम्पमानकराङ्घ्रिका ॥ ९० ॥

चिरात्प्रतीक्षितं कालं सहसा समुपस्थितम् ।
मनसाऽऽकलयन्ती च प्रतीकारविनिश्चिता ॥ ९१ ॥
यदि साङ्गुलिनिर्देशं सूचयेयं तदक्षणम् ।
तदाहं कृतकृत्या स्यामिति मेने क्षणं हि सा ॥ ९२ ॥
क्षणान्तरे तु सा दध्यौ न हीदं यन्मयेप्सितम् ।
आश्रितस्य समुच्छेदादिष्टार्थो न भवेदिति ॥ ९३ ॥
अथ कालोचितं वाक्यं गिरिजा प्राह रक्षिणः ।
आगतो यदि जाल्मः स्यादर्पयेयं हि तं ध्रुवम् ॥ ९४ ॥
ग्रामण्यो गिरिजावाक्ये शङ्का नासीन्मनागपि ।
प्रतीकारप्रतिज्ञा हि तदीया सर्वतः श्रुता ॥ ९५ ॥
अभिगच्छमथद्वारमुवाच पुरुषान्निजान् ।
समाप्तमिह नः कार्यं गमिष्यामोऽथ सत्वरम् ॥ ९६ ॥
नो चेदन्वेषणं रात्रौ भविष्यति सुदुष्करम् ।
कट्यत्वा च नमस्कृत्य वृद्धां स निरगात्ततः ॥ ९७ ॥

रक्षिणोऽन्येऽनुजग्मुस्तं भिन्दन्तः कर्कशस्वनैः ।
पादघट्टनशब्दैश्च प्रदोषस्य प्रशान्तताम् ॥ ९८ ॥
क्षणमेकं स्थिता वृद्धा निःशब्दा निश्चलापि च ।
रोषेण द्विगुणस्पष्टाः कुर्वती मुखरेरिकाः ॥ ९९ ॥
रक्षिणां तुमुलारावो मन्दमन्दोऽभवच्छनैः ।
भेरीनाद इवात्यारात् यावद्विलयमागतः ॥ १०० ॥
ध्वनिं निरवधानैव शृण्वती सा विदूरतः ।
आत्मानं पर्यवस्थाप्य जगाम प्राङ्गणं पुनः ॥ १०१ ॥
कूपिकामुपसर्पन्ती मुष्टिमाबध्य निश्चयात् ।
सञ्जातहृदयोत्कम्पा शुष्ककण्ठी विषादतः ॥ १०२ ॥
आवेगनिग्रहायासाज्जातसर्वाङ्गवेपथुः ।
आर्ता कासप्रकोपेन दुर्निवारेण साऽभवत् ॥ १०३ ॥
श्रुत्वाथ कासमानां तां युवा पप्रच्छ कूपतः ।
अपि त्वमागता मातस्तथेत्युक्तं तयापि च ॥ १०४ ॥

अपि याता नरा मातरित्यपृच्छद्युवा पुनः ।
तथेत्युक्तेऽब्रवीद्धर्षाद्ध्यान्धे भद्रमस्तु ते ॥ १०५ ॥
कूपान्तस्स्थं ततः साऽऽह मा स्तौषीर्हतपुत्रकाम् ।
मम पुत्रस्य यो हन्ता स नूनं दण्डमर्हति ॥ १०६ ॥
श्रुत्वा तद्वचनं बन्दी वज्राहत इवाभवत् ।
अस्या एव हतः पुत्रो मयेति सहसा स्मरन् ॥ १०७ ॥
स्तब्धोऽभूज्जलगण्डेन मरणं भावि चिन्तयन् ।
अर्धोच्चारितशब्दाश्च तत्कण्ठं समपीडयन् ॥ १०८ ॥
यावदन्तं यतिष्येहमात्मानमभिरक्षितुम् ।
इति निश्चित्य तूष्णीको मुहूर्तमभवद्युवा ॥ १०९ ॥
अन्तः क्षेप्स्यामि ते रज्जुमिति किं न मतिश्रुतम् ।
इत्यपृच्छद्युवा वृद्धां वचनैः स्खलिताक्षरैः ॥ ११० ॥
निरुत्तरा यदा सास्यात्तदा भूयो युवाब्रवीत् ।
नन्वु भद्रे परोधर्मः कृतवाग्दानरक्षणम् ॥ १११ ॥

प्रणोदितस्ततस्तस्या मौनवृत्त्या जगाद सः ।
अनाथायाश्रयं दत्वा रक्षित्वा रक्षिणां गणात् ॥ ११२ ॥
परोपकारशीला त्वं कथमद्य जहासि माम् ।
कल्याणि मा कुरुष्वैवमिति दैन्यादयाचत ॥ ११३ ॥
त्वमेव पुत्रहन्तेति नाविदं मन्दभागिनी ।
अतस्ते संश्रयो दत्तः पापस्येति जगाद सा ॥ ११४ ॥
मया नूनं हतः पुत्रो न तु बुद्धिकृतो वधः ।
शपे मम जनन्या ते वास्तवीं मे कथां शृणु ॥ ११५ ॥
अथैकदावयोर्मध्ये क्षेत्रे कार्यमसक्तयोः ।
चापलादुत्थितं द्वन्द्वमतिभूमिं च तद्गतम् ॥ ११६ ॥
प्राणसंशयमारुह्य तदानीं द्वावपि स्थितौ ।
दैवयोगान्न तु द्वेषादात्मजस्ते हतो बत ॥ ११७ ॥
तस्थौ सा भ्रुकुटिं बध्वा सङ्कोचितविलोचना ।
शोचनीयां कथां श्रुत्वा वराकस्यास्य दोषिणः ॥ ११८ ॥

ध्यायन्त्याः प्रियपुत्रस्य मरणं तत्तथाविधम् ।
पर्यभ्रमन्मनस्तस्या भूतवृत्तान्तगाहकम् ॥ ११९ ॥
तस्यौ दृष्टिपथे तस्या अविस्मर्यः स वासरः ।
आनीतः प्रियपुत्रस्य शवो यस्मिन् वयस्यकैः ॥ १२० ॥
स्वयमेवाश्रयो दत्तः पुत्रहन्त्रे मयाऽज्ञया ।
बद्धा चास्मि स्ववाचाहं किं नु कुर्यां बताधुना ॥ १२१ ॥
इति चिन्तयमाना सा विकल्पशतविह्वला ।
आपादमस्तकं वृद्धा क्षणद्वयमकम्पत ॥ १२२ ॥
स वराको मुहूर्तान्ते प्रार्थयामास तां पुनः ।
क्षिप्यतां सत्वरं रज्जुरत्रास्मि स्थातुक्षमः ॥ १२३ ॥
इत्येवं कथयन्नेव दन्तान् कटकटापयन् ।
कम्पमानश्च शैत्येन बद्धवाग्विरराम सः ॥ १२४ ॥
स्मृतीनामयुतैस्तस्या मनोऽभूद्यावदाकुलम् ॥
कूपस्याभ्यन्तरात्तावत्पुनरश्रूयत ध्वनिः ॥ १२५ ॥

माता मे नितरां वृद्धा दीना पङ्गुश्च निर्धना ।
अहो हर्षः कियानस्या द्रष्टुं मां पुनरागतम् ॥ १२६ ॥
वेत्सि पुत्रवती भूत्वा पुत्रशोकस्य वेदनाम् ।
तदार्तायां मदम्बायां दयां कुरु दयानिधे ॥ १२७ ॥
वचने श्रुतमात्रेऽस्मिन् तन्मुखं वलिभीषणम् ।
सौम्यतां सहसा प्राप चिरादनुपलक्षिताम् ॥ १२८ ॥
मातृनैसर्गिकप्रेमसम्पूर्णहृदया क्षणम् ।
व्यस्मरद्भूतवृत्तान्तं प्रतिज्ञामपि चात्मनः ॥ १२९ ॥
चिन्तयामास तन्मातुर्वृद्धाया दुरवस्थितिम् ।
पुत्रदर्शनहर्षं च सहसा भाविनं चिरात् ॥ १३० ॥
चोदितेवाथ दैवेन घटीयन्त्रे करं न्यधात् ।
संभ्रमेण च सा गुर्वीं कूपे रज्जुमपातयत् ॥ १३१ ॥
जलास्फालध्वनिर्मन्दः शुश्रुवे च क्षणाद्बहिः ।
गृञ्जलायाश्च कूपान्ते क्षणत्कारः प्रतिध्वनन् ॥ १३२ ॥

अचिराम्भिर्गतो बन्दी तत्पादपतितोऽभवत् ।
न चायं न च सा वृद्धा मुहूर्तं समभाषत ॥ १३३ ॥
निशागमात्पुरा याहीत्यादिष्टो वृद्धया युवा ।
मौनी तच्चरणौ स्पृष्ट्वा नत्वा च प्रस्थितः कृती ॥ १३४ ॥
तस्थौ विलोकयन्ती तमादृष्टिपथवर्तिनम् ।
अथ दीर्घं विनिश्वस्य कुटीरमगमच्छनैः ॥ १३५ ॥
तावच्चास्तमिते सूर्ये छाया तदनुगामिनी ।
स्थिता प्राङ्गणकोणेषु विकृताकारधारिणी ॥ १३६ ॥
विशन्ती शयनागारं विषण्णा गिरिजा भृशम् ।
सर्वाङ्गेष्वपि निःसत्त्वा शोचनीयदशां गता ॥ १३७ ॥
सहसा स्वप्रतिज्ञायाः स्मृतिराविश्य तन्मनः ।
अनिर्वाच्यसमावेगां जनयामास वेदनाम् ॥ १३८ ॥
क्षणात्सिद्धिमुपैष्यन्त्यां प्रतिज्ञायामहो मया ।
मूढया यापितः संधिश्चिराय प्रतिपालितः ॥ १३९ ॥

इति चिन्तयमानायाः समुल्लासः क्षयं गतः ।

यथा तस्मिन् क्षणे संध्याप्रकाशस्तिमिरागमात् ॥ १४० ॥

शयनीयमुपासर्पच्छनैः सा शोकविह्वला ।

नष्टकान्तिर्निरुत्साहा वृद्धीभूता विशेषतः ॥ १४१ ॥

शिथिलीभूतसर्वाङ्गी जीवितव्यनिरादरा ।

निस्तेजाः स्नेहशून्या च निर्वाणप्रायदीपवत् ॥ १४२ ॥

मस्तकं ताडयन्ती सा कुर्वाणार्तरवं मुहुः ।

विवशा चावसीदन्ती शयने स्वमपातयत् ॥ १४३ ॥

पुष्पिका.–"क्लिष्टस्यापि सुजातस्य सौजन्यं नापयास्यति ।"

इति क्षमायाः कृतिषु लोकवृत्तान्ताख्यानमालायां कथापञ्चके गिरिजायाः प्रतिज्ञा नाम कथा द्वितीया समाप्ता ।

हरिसिंहः

अस्ति सौराष्ट्रदेशान्तः कमलापुरपार्श्वतः ।
कश्चिद्ग्रामोऽनतिख्यातः शैलपादे प्रतिष्ठितः ॥ १ ॥
बभूवुर्वीथयस्तस्मिन् वक्रपांसुलसङ्कटाः ।
मृद्गृहाणि च जीर्णानि प्रतितो भूमिरूषरा ॥ २ ॥
निवासिनः क्षुधाक्षामा वसन्तः कच्चरावनौ ।
दृश्यन्ते स्म निरानन्दा नित्यं च भयशङ्किनः ॥ ३ ॥
स्थितास्ते विगतोत्साहाः सर्वे पौरुष्यवर्जिताः ।
दुःशासकयुगे बद्धास्तद्धारान्नतकन्धराः ॥ ४ ॥
अस्या ग्रामटिकायास्तु नातिदूरे कृतास्पदः ।
उवास मानसिंहाख्यो नृपतिः क्रूरशासनः ॥ ५ ॥
अस्याग्रे निखिलो लोकश्चकम्पे नतजानुकः ।
सिंहावलोकनात्त्रस्यन् मृगयूथो यथावने ॥ ६ ॥

तस्योन्मत्तविलासेषु सर्वदा दत्तदृष्टयः ।
आसन् सत्पुरुषाः केचिद्दीनलोका नुकम्पिनः ॥ ७ ॥
तेषामेकतमस्त्वासीद्युवा काश्चिदयापरः ।
उन्नतो हरिसिंहाख्यो मनस्वी प्रतिभान्वितः ॥ ८ ॥
एकदा शैशिरे काले बभूव किल सङ्कुलः ।
ग्रामस्यास्य महावीथिर्नरनारीजनार्भकैः ॥ ९ ॥
उत्सवार्थं गमिष्यन्तं द्रष्टुकामैर्नराधिपम् ।
इतरैश्चात्मदुःखानि निवेदयितुमुत्सुकैः ॥ १० ॥
क्षुधार्ता बलिना वृद्धास्त्वरन्ते स्म समुत्सुकाः ।
अर्धनग्नाः परेऽतिष्ठन् गृहकुड्यावलम्बिनः ॥ ११ ॥
बालका रोगिणः केचिदुपवीथ्यामशेरत ।
शालिधान्यकणान् काश्चिदुञ्छन्ति स्म च बालिकाः॥ १२ ॥
वराको बालकः काश्चित्कुब्जाङ्गश्च बृहच्छिराः ।
आसीनो गृहदेहल्यां क्रन्दति स्म क्षुधार्दितः ॥ १३ ॥

कृपालुर्हरिसिंहोऽपि समेत्य मिलितै र्जनैः ।
रुदन्तमर्भकं धृत्वा तदश्रूणि प्रमार्जयन् ॥ १४ ॥
समीपस्थापणात्क्रीतं दत्वा तस्मै च मोदकम् ।
प्रहृष्टजननीहस्ते भूयोऽप्येनं समार्पयत् ॥ १५ ॥
अथ कंचिदुपागम्य मार्गस्थं पिप्पलद्रुमम् ।
हनुमन्मन्दिरासन्नं तन्मूले जोषमास्त सः ॥ १६ ॥
ग्राम्याणां दीनमालापं राजानुग्रहकाङ्क्षिणाम् ।
श्रावं श्रावं युवा तेषामभूत्कारुण्यसंप्लुतः ॥ १७ ॥
दिनस्य सकृदाहारमपेक्षेऽहं न चाधिकम् ।
इत्येको वलिमान् वृद्धो रुरोद करुणस्वरम् ॥ १८ ॥
यवागूग्रासतृप्तास्मि वस्त्रखण्डं तु नास्ति मे ।
इत्याह स्थविरा काचिच्छीतसंजातवेपथुः ॥ १९ ॥
अपि नाम क्षुधार्ताय शिशवे दुग्धमाप्नुयाम् ।
विनष्टषडपत्यास्मि स्तन्याभावादहो विधे ॥ २० ॥

शुष्कस्तनी कथं सरव्यः पोषयेयं स्तनंधयम् ।
इति व्यलपदेकां स्त्री ताडयन्ती निजोरसि ॥ २१ ॥
नृपो ददात्वनाथाय वस्तुं मे क्वचिदास्पदम् ।
इत्यरोदीन्महाकुष्ठी कश्चिद्घोराविरूपितः ॥ २२ ॥
उपेत्य हरिसिंहस्तमभाषत दयाकुलः ।
आगच्छ मे गृहं भद्र माता दास्यति संश्रयम् ॥ २३ ॥
एवमाश्वास्यमानोऽपि रोगी न प्रत्ययं गतः ।
मस्तकं कम्पयित्वा च प्रवृत्तो रोदितुं पुनः ॥ २४ ॥
सहसा रथनिर्घोषो यावत्कर्णपथं गतः ।
व्यरंसीत्क्रन्दनं तावद्दीनानां ग्रामवासिनाम् ॥ २५ ॥
अथ राज्ञो रथे तस्मिन्नागते डम्बरान्विते ।
जनौघस्तमुपाधावत्कोलाहलविजृम्भितः ॥ २६ ॥
संमुखस्थनिजामात्यो नृपती रथमास्थितः ।
तं चानुजग्मतुर्योधौ हयारूढौ सुसज्जितौ ॥ २७ ॥

नृपतेर्मानसिंहस्य शरीरं स्थूलमांसलम् ।
सुपीवरौ कपोलौ च भोगोत्सेकमदर्शयन् ॥ २८ ॥
नेत्रे च बहिराध्माते लोहिते दर्पदर्शिनी ।
कृष्णश्चौष्ठपुटः स्थूलः सूचयन्ति स्म दुष्टताम् ॥ २९ ॥
देहिनोऽन्नं क्षुधार्ताः स्मो वस्त्राणि च महीपते ।
असह्यः शीतवातोऽयमित्ययाचन्त ते जनाः ॥ ३० ॥
निष्ठुरः स नृपो नीचः संभ्रमेण विलोकयन् ।
निराश्रयवराकांस्तान्न बभाषे मनागपि ॥ ३१ ॥
तत्कालं कर्णनिर्भेदी शुश्रुवे क्रन्दनध्वनिः ।
मन्दायितगती राज्ञः स्यन्दनश्च हठात्स्थितः ॥ ३२ ॥
आलोक्य बालकं कंचिद्रथस्याधः प्रपीडितम् ।
हरिसिंहोऽभिदुद्राव सहसा रक्षणेच्छया ॥ ३३ ॥
अवसृत्य रथस्याधः समुद्धृत्य च बालकम् ।
जनन्या निकटं तस्य त्रस्तायास्तूर्णमागमत् ॥ ३४ ॥

अथावतास्थिरे तूष्णीं ग्रामीणा दुःखपीडिताः ।
राजानुग्रहमीप्सन्तः परमोत्कण्ठया क्षणम् ॥ ३५ ॥
सान्द्रीभूय जनौघोऽथ प्रार्थनामुखरोऽभवत् ।
कठोरं तु मनो राज्ञो निर्विकारमवास्थितम् ॥ ३६ ॥
अपसार्य जनं क्षुब्धं सत्वरं हस्तसंज्ञया ।
आदिशत्पुरुषं राजा वाहयेति स्वसारथिम् ॥ ३७ ॥
कशाघातः सशूत्कारः शुश्रुवे सहसा ततः ।
धौरितेन ययुश्चाश्वा भीरुहृच्छेदकारिणः ॥ ३८ ॥
व्यघटन्त जनाः शीघ्रं विलपन्तो निराशया ।
शपन्तो निजदुर्दैवं दुरात्मानं च शासकम् ॥ ३९ ॥
हा धिक् कीदृशमन्याय्यं क्रियते पापिनामुना ।
इति शोचन्नपश्यत्तान् हरिसिंहः स्खलद्गतीन् ॥ ४० ॥
शीतेन कम्पमानाङ्गीमेकामालोक्य योषितम् ।
अपनीय शिरोवस्त्रं ददौ तस्यै स सादरम् ॥ ४१ ॥

श्रेयस्तनोतु देवस्ते चिरं जीव दयानिधे ।
इत्याह सा परं हृष्टा वपुराच्छाद्य वाससा ॥ ४२ ॥
ध्यायं ध्यायं क्षुधार्तानां ग्राम्याणां क्लेशसञ्चयम् ।
रुजार्तानां च मार्गान्ते कञ्चित्कालं स्थितो युवा ॥ ४३
प्रचक्राम ततः खिन्नमानसः करुणाकुलः ।
मानसिंहं प्रति क्रुद्धो दीनलोकनिपीडकम् ॥ ४४ ॥
अथ चास्तं गते सूर्ये प्राप पर्वतगह्वरम् ।
यत्र प्रतीक्षिणस्तस्थुरुत्सुकाः सुहृदस्त्रयः ॥ ४५ ॥
प्रदोषस्यान्धकारेऽथ घनीभवति सर्वतः ।
सूर्यांशुरतिसूक्ष्मोऽपि वारितोऽभूद्गुहान्तरात् ॥ ४६ ॥
तमोमयस्य कोणस्य भित्तिरन्ध्रस्य चान्तरे ।
अन्विष्यन्निर्गमद्वारमेको वभ्राम बम्भरः ॥ ४७ ॥
अन्यतश्चञ्चलो दीपो मन्दकान्तिरजीजनत् ।
छायारूपाणि चित्राणि खर्वभित्तिषु सर्वतः ॥ ४८ ॥

सुरक्षस्य मुखे चापि विशेषाद्भुतरूपिणः ।
आयतस्य च पल्ल्यन्तमनन्यविदितस्य च ॥ ४९ ॥
फलकं वर्तुलाकारमेकमासीद्गुहान्तरे ।
यत्संनिधावुपाविक्षद्धरिसिंहः सुहृद्वृतः ॥ ५० ॥
चत्वारोऽपि महोत्साहाः कर्तव्येषु समुत्सुकाः ।
आसन् प्रसभकर्तारो नृपच्छलविरोधिनः ॥ ५१ ॥
हरिसिंहेन सार्धं ते जज्ञुः कालपरिस्थितिम् ।
अधर्म्यां शोचनीयां च तादृशायाश्च कारणम् ॥ ५२ ॥
राजवंश्यप्रतिष्ठा तैर्मनागपि न मानिता ।
गतानुगतिकत्वं च गुरूणां न समादृतम् ॥ ५३ ॥
प्रत्यहं संमिलन्ते स्म कन्दरेऽस्मिंस्तमोमये ।
पठितुं पुस्तकान्येते प्रतिषिद्धानि पूर्वजैः ॥ ५४ ॥
समाप्ते पठने चक्रुर्जिज्ञासां च परस्परम् ।
यावदर्थः समग्रोऽपि गृहीतोऽभूदसंशयम् ॥ ५५ ॥

राजदर्शनसंरंभादुपावृत्तमशीर्षकम् ।
विलोक्य हरिसिंहं ते बभूवुरतिविस्मिताः ॥ ५६ ॥
तेष्वेको रूपसिंहाख्यः पटीयान् कुलपुत्रकः ।
सम्भ्रान्त इव पप्रच्छ निरुष्णीषोऽसि किं सखे ॥ ५७ ॥
कस्यैचिदबलायै तच्छीर्षवस्त्रं सखे निजम् ।
शीतेन कम्पमानायै पल्लिकायामदामहम् ॥ ५८ ॥
इत्युक्त्वा वर्णयामास लोकवृत्तमशेषतः ।
दृष्टश्रुतानुभूतानि चेष्टितानि च भूपतेः ॥ ५९ ॥
हा धिक् पशुरसौ क्रूरो ध्वंसतां निजपातकात् ।
निश्चितं तद्यथा रात्रौ करिष्यामस्तथाऽचिरात् ॥ ६० ॥
इत्युक्ते पुनरप्राक्षीत्तृतीयः संशयी सखा ।
कुरूपी कुब्जपीनाङ्गः किमेषा सत्यवागिति ॥ ६१ ॥
ननु निश्चितपूर्वं तदस्माकमिह मेलनम् ।
कृत्यमद्यैव तत्कार्यमन्यदा तन्न सेत्स्यति ॥ ६२ ॥

इत्यूर्जितानुभावाढ्यं हरिसिंहोऽब्रवीद्वचः ।
वारयन् पुनरालापं सुहृदां संशयात्मकम् ॥ ६३ ॥
तदमोघप्रहाराय वर्तते किमु साधनम् ।
पर्याप्तमिति पप्रच्छ रूपसिंहः ससम्भ्रमम् ॥ ६४ ॥
न जाने गुलिकाक्षेपमात्मरक्षार्थमप्यहम् ।
इत्यभाषत कुब्जाङ्गो दृढाङ्गोऽप्यविशारदः ॥ ६५ ॥
तत्कर्तुमधिकारो मे कुशलोऽस्मि प्रयोगतः ।
इत्युच्चैरूपसिंहोऽथ प्रसभं प्रत्यभाषत ॥ ६६ ॥
इति वादिनमाचष्ट हरिसिंहस्सगौरवम् ।
वरं रात्रिरुपायातु करिष्यामोऽथ निर्णयम् ॥ ६७ ॥
सम्यगादौ तु युष्माभिर्विमर्शः क्रियतां स्वतः ।
मद्वाक्यमेव नात्यन्तं प्रमाणत्वेन गृह्यताम् ॥ ६८ ॥
प्रेरितो हि निसर्गेण कार्यैऽहं निश्चयं गतः ।
इति धीरः स्वमित्राणि हरिसिंह उपादिशत् ॥ ६९ ॥

मैवं भाषस्व हे साधो अमोघस्ते हि निर्णयः ।
आर्जवं तव जानीम इत्यवोचन् वयस्यकाः ॥ ७० ॥
किमयं निर्णयस्तर्हि त्रयाणामपि संमतः ।
इति पप्रच्छ मित्राणि हरिसिंहः प्रमाणतः ॥ ७१ ॥
तथेति प्रतिपन्नेषु हरिसिंहोऽब्रवीत्पुनः ।
जाने हिंसान्वितं कर्म निषिद्धं धर्मशास्त्रतः ॥ ७२ ॥
नूनमेतन्मम द्वेष्यं कालस्तु तदपेक्षते ।
इत्युक्ते हरिसिंहेन रूपः प्रत्याह तं सखा ॥ ७३ ॥
वधोऽयं मानसिंहस्य नृशंसस्य ध्रुवं भवेत् ।
अनाथदीनसाहस्रमजानां परमं हितम् ॥ ७४ ॥
यत्तु कर्म शुभोदर्कं कार्यं तन्निर्विकल्पतः ।
इत्युवाच युवा तेषां कनिष्ठो यः कृशाङ्गकः ॥ ७५ ॥
मृते तस्मिन् सुदैवेन न काप्यनुभविष्यति ।
वैधव्यस्य महाशोकमनूढस्येति चापरः ॥ ७६ ॥

न चास्य विद्यतेऽपत्यमनुकर्तुं नृशंसताम् ।
धिग्जाल्मामिति रोषेण रूपसिंहोऽब्रवीद्वचः ॥ ७७ ॥

अथ किं नाम संवृत्तं धनिकस्याप्रदायिनः ।
राज्ञा मार्गितावित्तस्येत्यपृच्छद्दारकोंऽसलः ॥ ७८ ॥

सर्वस्वापहृतिस्तस्य यावज्जीवं च बन्धनम् ।
इत्युक्ते रूपकः प्राह धिक् तं नीचमिति क्रुधा ॥ ७९ ॥

जनको रूपसिंहस्य राजवैद्यः पुरा किल ।
शिरोर्तिं मानसिंहस्य न शशाक व्यपोहितुम् ॥ ८० ॥

अतिक्रुद्धस्य राज्ञोऽथ दण्डितोऽभूद्दुराज्ञया ।
शरीराच्चर्म निष्कृष्य मन्दभाग्यो भिषग्वरः ॥ ८१ ॥

स्मरणात्स्वापितुर्मृत्यो रूपसिंहस्य मानसम् ।
क्वथ्यते स्म दिवारात्रं प्रज्वलत्क्रोधवन्हिना ॥ ८२ ॥

अथ तूष्णीमतिष्ठंस्ते क्षणमात्रं कुमारकाः ।
भ्रमरं यावदुत्थाय हरिसिंहो व्यमोचयत् ॥ ८३ ॥

भित्तिरन्ध्रमथोपेत्य परिमाणं निरूप्य सः ।
आग्नेयास्त्राय पर्याप्तमिदं ह्यन्तेत्यवोचत ॥ ८४ ॥
ततः पीठमुपागत्य हरिसिंहोऽब्रवीत्पुनः ।
मध्यरात्रे पथानेन मानसिंहः प्रयास्यति ॥ ८५ ॥
आगन्तव्यमतोऽस्माभिरिह गुप्तं सुसज्जितैः ।
नृपस्यागमनात्पूर्वं घटिकाद्वयमन्तरा ॥ ८६ ॥
अप्येकमत्यमापन्ना इति पृष्टा वयस्यकाः ।
तथेति समकण्ठेन प्रावोचन्नाविकल्पतः ॥ ८७ ॥
गृहीता यदि दुर्दैवात्कार्यान्ते नृपरक्षिभिः ।
किमारोढुं वधस्तम्भं सज्जाःस्थेत्यभिधीयताम् ॥ ८८ ॥
इत्युक्ते हरिसिंहेन दोलायितहृदः सखीन् ।
तूष्णीमवस्थितान्दृष्ट्वा कर्तव्यं स्पष्टमाह सः ॥ ८९ ॥
ननु कृत्यं समाप्यैव सुरंगस्य पथा बहिः ।
गन्तव्यं दूरमस्माभिः प्रागुदन्तमसारतः ॥ ९० ॥

तच्छ्रुत्वा निर्विवादेन न्यवृतन् स्वगृहाणि ते ।
प्रवासोचितवस्त्रादिवस्तूनामानिनीषया ॥ ९१ ॥

न्यवसत्पल्लिकोपान्ते हरिसिंहः सहाम्बया ।
चिराय पितृहीनः सन्नात्मनः क्षेत्रसंनिधौ ॥ ९२ ॥

अन्नवस्त्रादिसंपत्त्या यद्यप्यास्तां सुखोषितौ ।
तथापि न तयोरासीत् कथालापो निरर्गलः ॥ ९३ ॥

न कदापि पुरस्तस्य वभाषे सा मनागपि ।
अधिकृत्य स्वभर्तारं मृतं प्राक् पुत्रजन्मतः ॥ ९४ ॥

लभसे त्वं कुतो मातर्जीवनाय धनादिकम् ।
इति सोऽपि कदाप्येनां न चापृच्छत्कुमारकः ॥ ९५ ॥

प्रष्टुकामोऽपि वृत्तान्तं जनकस्यात्मनो युवा ।
मौनमेवाश्रयद्धीमान् जननीक्लेशशङ्कया ॥ ९६ ॥

तदीयजननी ह्यासीद्राजवंश्यकुलोद्भवा ।
निजवंशाङ्कुरीभूता दैवेनैकावशेषिता ॥ ९७ ॥

किमाश्चर्यमतः सा चेत्प्रशंसेत नृपान्वयम् ।
निन्द्यमप्यथ वा दोषं ममतान्धो न पश्यति ॥ ९८ ॥

प्रशंसां तत्कृतां श्रुत्वा विस्मितोऽपि कुमारकः ।
नृपस्य च्छलमुद्दिश्य नैव किंचिदभाषत ॥ ९९ ॥

सुतस्य वर्धमानस्य पश्यन्ती मितभाषिताम् ।
अतिपाठनिमित्तां तां मन्यतेऽस्म तदम्बिका ॥ १०० ॥

अधीते साधु मे पुत्रस्तच्च श्रेयो विधास्यति ।
तस्य प्राप्ताधिकारस्येत्युवाच प्रतिवेशिनः ॥ १०१ ॥

कीदृक पदं स लब्धेति जिज्ञासुरपि तज्जनः ।
न तामायासयामास प्रश्नैर्वृद्धां मनागपि ॥ १०२ ॥

हरिसिंहो गृहं प्राप्य दृष्ट्वा चैनां बहिर्गताम् ।
प्रहारगुलिकान्वेषी परमाश्वासमाप्तवान् ॥ १०३ ॥

ग्रामण्यै गुलिकाः काश्चित्पुरा दत्ता मदम्बया ।
इति स्मरन् गवेषाय सोपानं चारुरोह सः ॥ १०४ ॥

दृष्ट्वा कोष्ठे निजाम्नाया महतीं रीतिपेटिकाम् ।
अत्र हि स्याद्यदन्वेष्यामिति तत्साविधं ययौ ॥ १०५ ॥
आदाय कुञ्चिकामस्या लोहकीलावलम्बिनीम् ।
हरिसिंहो विना क्लेशं पिधानमुदघाटयत् ॥ १०६ ॥
एकैकशोऽपनीतेषु सम्भारेषु ददर्श सः ।
क्वचित्करण्डके न्यस्तं त्रापुषे गुलिकाचयम् ॥ १०७ ॥
ततः काश्चिदुपादाय द्रुतं कोशे निगूह्य च ।
वस्तुशेषं पुनः पेटयां निधातुमुपचक्रमे ॥ १०८ ॥
अस्पृशत्स युवा यावद्वसनग्रन्थिमेकतः ।
तावच्चन्दनमञ्जूषा तस्याभूद्दृष्टिगोचरः ॥ १०९ ॥
सम्पुटे विवृते तस्मिन्नदृश्यत तदन्तरे ।
जीर्णा प्रतिकृतिः काचिद्भूरिविस्मयकारिणी ॥ ११० ॥
अहो चित्रमिदं नूनमाकृत्या सदृशं मम ।
आजन्मतस्तु नो चित्रे न्यस्तोऽस्मि तादिदं कुतः ॥ १११ ॥

इति ध्यायन् युवा यावद्धृद्धदृष्टिर्निरीक्षते ।
तावदस्याः परे भागे नृपतेर्नाम दृष्टवान् ॥ ११२ ॥
उद्भ्रान्तेन यदा तूर्णं मञ्जूषाऽधोमुखीकृता ।
तदा करतले तस्य न्यपतल्लेखसञ्चयः ॥ ११३ ॥
लेखास्ते लिखिता ह्यासन्मानसिंहेन यौवने ।
जनन्यै हरिसिंहस्य ततः प्राग् बहुवर्षतः ॥ ११४ ॥
पठन्नेकं विवर्णोऽभूत्प्रेमपत्रं कुमारकः ।
महाशीतज्वरेणेव जातकम्पो बभूव च ॥ ११५ ॥
लेखे समर्पितालोको मुहूर्तमिव निश्चलः ।
इतिकर्तव्यतामूढः शून्यदृष्टिरवस्थितः ॥ ११६ ॥
विवशोऽभूत्तथा मोहाद्यथा मातुरुपास्थितिः ।
न तेन लक्षिता यावत्संमुखे सा स्थिताभवत् ॥ ११७ ॥
किं नु मार्गसि कोष्ठेऽस्मिन्निति पृष्टः स निष्ठुरम् ।
चित्रमेतत्कथं प्राप्तमित्यपृच्छत्सगद्गदम् ॥ ११८ ॥

पठितं हि त्वया पत्रं वेत्स्येव निखिलं स्वतः ।
इति प्रतिब्रुवाणायां सक्तदृष्टिस्तथा स्थितः ॥ ११९ ॥
यथासौ क्रोधताम्राक्षस्तदुद्देशविभावनात् ।
परुषं वक्तुकामोऽपि न भाषितुमपारयत् ॥ १२० ॥
क्षणं निःशब्दगम्भीरमासीत्सर्वं ततः परम् ।
बुद्धा चालक्षयत्सूनोर्मुखे निश्चयमुद्रिकाम् ॥ १२१ ॥
कुतस्त्वं चिन्तयाऽऽक्रान्त इति पृष्टोऽथ सोऽब्रवीत् ।
अम्ब कस्मादियत्कालं पितुर्वृत्तं न मेऽब्रवीः ॥ १२२ ॥
यदि पृच्छसि भर्तारं शृणु वत्स ब्रवीमि ते ।
न सम्यग् विदितोऽयं मे विवाहादचिरान्मृतः ॥ १२३ ॥
मृते पितरि जातः किमहं ब्रूहीति वादिनम् ।
मनाग् विलम्ब्य सावादीन्नु जीवति ते पिता ॥ १२४ ॥
अहो धिगिति विभ्रान्तो लज्जयोपहतान्तरः ।
जातमन्युः स चुक्रोश निन्दन् दुर्दैवमात्मनः ॥ १२५ ॥

अन्यादृशमिवालोक्य तन्मुखं सा भयाकुला ।
स्कन्धे स्वहस्तमाधाय पुत्रमन्वनयत्ततः ॥ १२६ ॥
कथयिष्यामि मद्वृत्तं न मां वत्स तिरस्कुरु ।
यथा पाणिग्रहात्पूर्वं कश्चिन्मां चकमे युवा ॥ १२७ ॥
स एव मानसिंहोऽयं स च मां देवमन्दिरे ।
अपश्यदथ नौ वृत्तो गान्धर्वोद्वाहसंगमः ॥ १२८ ॥
ततो मां वोढुकामोऽपि राजवंश्यकुलोद्भवाम् ।
मानसिंहो वयोवृद्धैर्मत्संगात्प्रत्यरुध्यत ॥ १२९ ॥
ततस्त्वज्जन्मतः पूर्वमूढ्वा कश्चित्कृषीवलः ।
गर्भिणीं मां निजावासं निनाय परमादरात् ॥ १३० ॥
तत्र विश्वासिना तेन सुखमासमशङ्किता ।
अथ तन्मरणादूर्ध्वं जातोऽसि शुभलक्षण ॥ १३१ ॥
हा धिग्वरं मृतो गर्भे न जातः पुनरीदृशः ।
इत्यशोचद्युवा भूयो दुःखोपहतचेतनः ॥ १३२ ॥

समाश्वसिहि पुत्र त्वां राजस्वमुपतिष्ठति ।
इत्यसौ सान्त्व्यमानोऽपि नोत्तरं प्रत्यपद्यत ॥ १३३ ॥
अथ भोजनवेलायामपि मौनमुपाश्रितः ।
मुखे पर्याकुलीभावं नैव कंचिददर्शयत् ॥ १३४ ॥
सुतो मे हन्त संतुष्टः शुभोदर्कविभावनात् ।
इत्यमन्यत वृद्धापि स्ववंशोदयगर्धिनी ॥ १३५ ॥
हरिकीर्तनमुद्दिश्य मन्दिरं प्रतिबोधिनः ।
यास्यामि किं मया सार्धमैष्यसीति जगाद सा ॥ १३६ ॥
मुहूर्तमिव तां पश्यन् हरिसिंहोऽब्रवीत्ततः ।
व्यापृतोऽस्मि स्वपाठेऽम्ब त्वमेका गन्तुमर्हसि ॥ १३७ ॥
अतिक्रान्तेऽथ यामार्धे युवा निर्गत्य मन्दिरात् ।
प्रहारगुलिकोपेतः प्रतस्थे गिरिकन्दरम् ॥ १३८ ॥
प्रागेव मिलितास्तत्र वयस्यास्तं बभाषिरे ।
असंनद्धः प्रवासाय चिरेणासि किमागतः ॥ १३९ ॥

किं नु पाथेयतः कार्यमिति यावज्जगाद सः ।
बभूवुर्वचने तस्य सखायस्ते ससंशयाः ॥ १४० ॥
अथान्यच्चिन्तितं किञ्चिदिति पृष्टः सहायिभिः ।
न खल्वलं विकल्प्येति व्याजहार सुनिश्चितम् ॥ १४१ ॥
अथाध्यानपरा अन्ये यावत्तूष्णीमवस्थिताः ।
हरिसिंहो बहिर्लक्ष्यः पश्यति स्म गवाक्षतः ॥ १४२ ॥
अलङ्कृतापि तारामिर्निशाऽदृश्यत भीषणा ।
मृत्योश्चित्रपटी नीला छादयन्तीव विष्टपम् ॥ १४३ ॥
अभितः कन्दरं हृष्टास्तरुच्छायापिशाचिकाः ।
निशापर्यटनं कर्तुमुद्यता इव रेजिरे ॥ १४४ ॥
सहसाथ परावृत्य हरिसिंहोऽब्रवीत्सखीन् ।
पलायध्वमितः शीघ्रं सुरङ्गस्य पथा बहिः ॥ १४५ ॥
पलायनस्य को हेतुरपि त्रस्तोऽसि नु स्वयम् ।
इति रूपेण पृष्टोऽसौ प्रत्युवाच ससम्भ्रमम् ॥ १४६ ॥

एवं न खलु वाच्यं तत् सर्वेषां च सुखाय नः ।
निखिलं साधयिष्येऽहमिति मे प्रत्ययो दृढः ॥ १४७ ॥
सावेगं रूपकः प्राह नृपरक्तोपपासितः ।
मम खल्वधिकारोऽयं तद्वधश्चिरमीप्सितः ॥ १४८ ॥
वैरबुद्धयैव कार्येऽस्मिन्न प्रवर्तितुमर्हसि ।
इत्यसौ हरिसिंहेन बोधितः पुनरब्रवीत् ॥ १४९ ॥
किमस्मान्निश्चितात्कार्यान्निवारयितुमिच्छसि ।
इति पृच्छन्तमाहुस्तमन्ये सानुनयं वचः ॥ १५० ॥
मा तावदन्तरा रोद्धुं हरिसिंहं त्वमर्हसि ।
विवक्षितमशेषं स ब्रवीतु क्रमशः सखे ॥ १५१ ॥
अपवाहयितुं कस्मादयमिच्छति नो हठात् ।
इति न ज्ञायते किन्तु जिघांसामि स्वयं नृपम् ॥ १५२ ॥
अतो नाहं गमिष्यामि वधो यावन्न साध्यते ।
नृपतेरस्य दुष्टस्य किं वादेन वृथाधुना ॥ १५३ ॥

इत्युक्ते रूपसिंहेन पीवराक्षो युवाब्रवीत् ।
अमोघो हरिसिंहस्य निर्णयः किल सर्वदा ॥ १५४ ॥
अथ साग्रहमाचख्यौ ग्रहिलो रूपकः पुनः ।
हरिसिंहः स्वयं यातु न्यस्तभारो मयीति सः १५५ ॥
मदीयास्त्रेण नैव त्वं ग्रहर्तुं मित्र शक्नुयाः ।
इत्युक्ते हरिसिंहेन रूपः प्रोवाच कोपनः ॥ १५६ ॥
किमस्मान्मधुरैर्वाक्यैः प्रतारयितुमिच्छसि ।
ननु ते तत्प्रतीकारं करिष्येऽहं यथार्हतः ॥ १५७ ॥
अथान्यौ सुहृदौ क्रुद्धौ सोपालम्भमवोचताम् ।
कथमार्यं च धिग् रूप हरिसिंहं विशङ्कसे ॥ १५८ ॥
परिवर्धितमन्युस्तं रूपसिंहोऽब्रवीत्पुनः ।
गूढचारोऽसि रे राज्ञो हरिसिंहेति निष्ठुरम् ॥ १५९ ॥
ततोऽब्रवीद्युवा पीनः खलूक्त्वा खलजल्पितम् ।
इतस्त्वमेव निर्याहि न दूष्योऽयं पुनस्त्वया ॥ १६० ॥

अपेतव्यमितोऽस्माभिर्यथैवायं प्रशास्ति नः ।
स एव नायकोऽस्माकं न पुनस्त्वं प्रजल्पकः ॥ १६१ ॥
इत्यादिष्टोऽप्यसौ मित्रैर्हरिसिंहमतर्जयत् ।
उपदेक्ष्यामि ते बुद्धिं भीरुकश्चेद्भवेरिति ॥ १६२ ॥
रूपसिंहस्तदा प्रेक्ष्य हरिसिंहं निरुत्तरम् ।
पप्रच्छ मत्प्रतिज्ञातं श्रुतमेतन्ननु त्वया ॥ १६३ ॥
एवमस्तु परं शीघ्रं युष्माभिर्गम्यतामितः ।
अनेनैवाध्वना राजा न चिरात्पुरमेष्यति ॥ १६४ ॥
पूर्वमेवागमात्तस्य विदूरमपसर्पत ।
इत्युक्त्वा हरिसिंहोऽदाद्रूपाय त्रपुदीपकम् ॥ १६५ ॥
अथ त्रयोऽपि तूष्णीं ते गृहीत्वा निजभाण्डकम् ।
अन्धकारे सुरङ्गस्य क्षणाज्जग्मुरदृश्यताम् ॥ १६६ ॥
निशायां क्षीयमाणायां हरिसिंहोऽथ कन्दरे ।
पीड्यमानो विकल्पौघैरेकाकी विह्वलः स्थितः ॥ १६७ ॥

ध्यायन् यौवनकालीनां दशां मातुरयन्त्रिताम् ।
दर्शनं मानसिंहस्य प्रथमं देवमन्दिरे ॥ १६८ ॥
अनुरागं तयोर्मध्ये वर्धमानं दिने दिने ।
परिणामं च तत्प्रेम्णो हेपणं च यशोहरम् ॥ १६९ ॥
अथाकलय्य तद्वृत्तमात्मनो जन्मदूषकम् ।
लज्जारोषजुगुप्साभिः परं पर्याकुलोऽभवत् ॥ १७० ॥
दीनान् दुनोति यो धूर्तः स एव वत मे पिता ।
इति शोचन्नविश्रान्तमात्मानमजुगुप्सत ॥ १७१ ॥
पितृहत्या महत्पापमिति घोषयतो गुरोः ।
धर्मोक्तिः श्रोत्रयोरन्तः प्रतिध्वनिमिवाकरोत् ॥ १७२ ॥
ललाटमभवत्तस्य स्वेदबिन्दुभिरन्वितम् ।
प्रतिपत्तिविमूढस्य चिन्तामथितचेतसः ॥ १७३ ॥
अथाचिराद्विदूरेण रथनेमिध्वनौ श्रुते ।
हृदयं हरिसिंहस्य विह्वलस्यास्फुरद्भृशम् ॥ १७४ ॥

बद्धदृष्टिर्युवा यावदवैक्षत गवाक्षतः ।
स्यन्दनस्य ध्वनिस्तावद् भूयो भूयो व्यवर्धत ॥ १७५ ॥
अचिरान्मानसिंहस्य स्यन्दनः परिवारितः ।
उपरक्षैर्हयारोहैरस्य दृष्टिपथं गतः ॥ १७६ ॥
यदासीच्चित्तमायस्तं सहसाऽभूत्तदुज्ज्वलम् ।
स चापि विलसन्नेत्रो झटिति प्रोत्थितः स्थितः ॥ १७७ ॥
प्रहारं कृतवत्येव गुलिकाभिर्गवाक्षतः ।
केनाप्यार्तरवेणाभून्निशायाः शान्तता हृता ॥ १७८ ॥
कन्दराद्धहिराकर्ण्य धडत्कारध्वनिं ततः ।
सैनिकःकोऽपि विध्वस्तःस्यादित्ययमतर्कयत् ॥ १७९ ॥
उदग्रचरणैर्वाहैर्वित्रस्तैर्मुक्तरश्मिभिः ।
पलाय्यत समुक्रान्तै रथमाकृष्य वेगतः ॥ १८० ॥
चक्रनेमिध्वनिर्दूरान्मन्दमन्दोऽभवच्छनैः ।
प्रतिश्रुदार्तरावस्य श्रूयते स्म पुनश्चिरम् ॥ १८१ ॥

चपलःसैनिकः कश्चिच्चटुलाङ्गो हयाभिजात् ।
अवप्लुत्य नतः सख्युरुत्तानस्य शवोपरि ॥ १८२ ॥
प्रहारागतिजिज्ञासुरीक्षते स्म प्रयत्नतः ।
विलक्षणझणत्कारं रचयन्निजवर्मणः ॥ १८३ ॥
गुहामभिययौ यावत्सैनिकोऽध्वानमामृशन् ।
हरिसिंहो निरुच्छ्वासस्तस्थौ लीनस्तदन्तरे ॥ १८४ ॥
अश्वारोहस्तु यत्किंचिदपश्यन् संशयास्पदम् ।
न्यवर्तत दरीपार्श्वाद्वृथाभूतपरिश्रमः ॥ १८५ ॥
अथ भूयो झणत्कारी मित्रस्यैत्य कलेवरम् ।
उद्धृत्य च शवं तस्य प्रचचाल जवात्ततः ॥ १८६ ॥
सर्वतश्च प्रशान्तेऽपि चिरायान्तः स्थितो युवा ।
पश्यति स्म तमःपुञ्जे निःशब्दजडनिश्चलः ॥ १८७ ॥
शनैःशनैरथोत्थाय प्रेक्षमाणः समन्ततः ।
स निष्क्रम्य गुहागर्भात्तमिस्रायामगाहत ॥ १८८ ॥

श्रामं श्रामं निजावासं प्रतियास्यन् युवाऽध्वनि ।
रक्षिणां क्रन्दनं शृण्वन् नृपालवधघोषिणाम् ॥ १८९ ॥
अचिरादेव संप्राप पल्लिकायाश्चतुष्पथम् ।
यतश्चैकतमो मार्गः स्वमातृगृहमभ्यगात् ॥ १९० ॥
मन्दिराभिमुखं पश्यन् शून्यदृष्टिः क्षणं स्थितः ।
विनिश्चलो युवा तत्र कर्तव्यमभिचिन्तयन् ॥ १९१ ॥
अथ प्रतीपमध्वानमुपाश्रित्य जगाम सः ।
जीवे वैरस्यमापन्नो गुल्मकं ग्रामरक्षिणाम् ॥ १९२ ॥
पुष्पिका.—लोकसेवासक्तानां जगदेव कुटुम्बकम् ।

इति क्षमायाः कृतिषु लोकवृत्ताख्यानमालायां कथापञ्चके
तृतीया हरिसिंहकथा समाप्ता ।

दन्तकेयूरम् ॥

पारेतालीवनं पल्ल्यां श्रूयते स्म विदूरतः ।
मृदङ्गवेणुनिर्घोषी होलिकोत्सवडम्बरः ॥ १ ॥
अवर्धत निनादोऽयं कर्कशैर्मुखवादनैः ।
मधूत्सवमहृष्टानामुन्मत्तग्रामवासिनाम् ॥ २ ॥
मत्स्याजीवो गणुर्भार्यां भुक्तासीनो गृहाङ्गणे ।
उवाच श्वो वसिष्येऽहं जीर्णमेवाम्बरं प्रिये ॥ ३ ॥
शयानं सुतमङ्गुल्या दर्शयन्पुनराह सः ।
न देह्यस्मै नवं वस्त्रं मा स्म तन्मलिनं भवेत् ॥ ४ ॥
अथ भार्याऽब्रवीद्राधा का हानिः क्षालयाम्यहम् ।
लाक्षांबुसेचनं कार्यं सर्वथा साम्प्रदायिकम् ॥ ५ ॥
अपि त्वं बालकं तर्हि तत्कर्तुमनुमोदसे ।
इति पृष्टाऽब्रवीद्राधा सामिवारितजृम्भिका ॥ ६ ॥

अथ किं तस्य हेतोर्हिं क्रीतं सेचनशृङ्गकम् ।
श्वो जन्मादिवसश्चास्य क्रीडतु स्वैरमर्भकः ॥ ७ ॥
सोऽप्याह क्रियतामिष्टं मा पुनर्भूदतिश्रमः ।
हृदयं तव निस्सत्त्वं रक्षणीयं हि यत्नतः ॥ ८ ॥
निरुत्तरामथालिङ्ग्य पप्रच्छ कुशलं नु ते ।
सा च मन्दमवादीत्तं तथैवेति स्मिताननना ॥ ९ ॥
प्रत्यूषे शयनं मुक्त्वा परेद्युर्व्यापृताऽभवत् ।
प्रागेव पत्युरुत्थानाद्राधिका गृहकर्मसु ॥ १० ॥
सिञ्चन्ती चोपलिम्पन्ती चित्रयन्ती गृहाङ्गणम् ।
रंगवल्लीकृताकारैः श्रपयन्ती च भोजनम् ॥ ११ ॥
समाप्तगृहकार्यार्थं पेटिकामुपगम्य सा ।
तूष्णीं पिधानमुद्धाट्य शुभं वसनमाददे ॥ १२ ॥
यत्नेन वेष्टयन्ती स्वमात्मानमतिकर्शितम् ।
आपादमामुच्चद्धस्त्रमजातिसदृशक्रमम् ॥ १३ ॥

कण्ठे माङ्गलिकं सूत्रं बाहौ दान्तिकमण्डनम् ।
द्वयमाभरणं मुक्त्वा न सा परमधारयत् ॥ १४ ॥
वंशक्रमागतं तच्च गणुना बहुमानितम् ।
केयूरं न कदाप्यस्याः कृशं बाहुममुञ्चत ॥ १५ ॥
होलिकादिवसात्माक्तु राधिका तदपानयत् ।
अधारयच्च तत्स्थाने राजतं मातुरङ्गदम् ॥ १६ ॥
अथैवं मण्डिता राधा निदधे पेटिकोपरि ।
स्वपत्युर्धौतवस्त्राणि धारणाय मधूत्सवे ॥ १७ ॥
ततोऽस्थादुपशालायां व्यापृता सा परीक्षणे ।
क्रतीनामपि वस्तूनां क्रीतानां प्राग् दिने स्वयम् ॥ १८ ॥
प्रागेव भर्तुरुत्थानान्मात्स्यिकस्याविजानतः ।
अखिलान्यपि वस्तूनि गोपयामास सैकतः ॥ १९ ॥
मध्याह्नभोजने वृत्ते बालकस्तातिपितापि च ।
रङ्गसेकविहाराय गन्तुमास्तां समुद्यतौ ॥ २० ॥

तावब्रवीत्तदा राधा विहरेतं यथेच्छया ।
मत्कृते न त्वरा कार्या पुनरागन्तुमालयम् ॥ २१ ॥
जालजीवी तदाकर्ण्य क्षणमात्रमचिन्तयत् ।
किमेका कर्तुकामास्यादिति विस्मितमानसः ॥ २२ ॥
साकूतमथ तां पश्यन् फलकं भित्तिगं गतः ।
आदातुं निजमुष्णीषं स्थापितं यत्नतस्तया ॥ २३ ॥
शिरसि मतिमुच्चैनदपनीय च तत्क्षणात् ।
जवादपरितोषेण निधाय फलके पुनः ॥ २४ ॥
नाहं तत्परिधास्यामि परं जीर्णं हि दृश्यते ।
अग्रे रंम्बादिमित्राणां मा गमं परिहास्यताम् ॥ २५ ॥
जानासि त्वमसौ दर्पाद्यथा रंगुर्विकत्थते ।
इत्यालपन्तमाकर्ण्य व्याकुला सा तमैक्षत ॥ २६ ॥
अपि नाम लभेयान्यद्भूतनं शीर्षवेष्टनम् ।
इत्यवादीद्गुणुर्भूयो दर्शयंस्तुष्टिशून्यताम् ॥ २७ ॥

अथैवमधनावस्थामनुशोचन्तमात्मनः ।
राधिका मधुरैर्वाक्यैः सान्त्वयामास वल्लभम् ॥ २८ ॥
अनत्यशोभनं नाथ प्रतिभाति हि शीर्षकम् ।
पूर्वेद्युः क्षालितं सद्यः पुटीकृत्य निवेशितम् ॥ २९ ॥
सर्वथा न चिरादेव भविष्यति मलीमसम् ।
मार्दितं चेदमुष्णीषं मुहुर्लाक्षाम्बुसेचनात् ॥ ३० ॥
प्रायो नूनमवाप्तासि नूतनं भाविवत्सरे ।
इत्युक्त्वा चक्षुषा बालं वक्तुकामं न्यवारयत् ॥ ३१ ॥
अल्पार्जकस्य तत्राशा महती मे न विद्यते ।
इत्युक्त्वा दर्पणं पश्यन्नुष्णीषं शिरसि न्यधात् ॥ ३२ ॥
हन्त पश्य कियद्रम्यमधुना दृश्यते प्रिय ।
पुराणमिदमुष्णीषं शुभदं ते हि सर्वदा ॥ ३३ ॥
गणुना सशिरःकम्पं प्रत्याख्यातं तु तद्वचः ।
अथामृद्नात्करं मातुर्बालकस्त्वरयन्निव ॥ ३४ ॥

तत्कर्णे चाब्रवीन्मन्दमात्मनो यद्विवाक्षितम् ।
ततः शृङ्खकमादाय विहर्तुं सखिभिर्ययौ ॥ ३५ ॥

प्रतस्थे च ततः सोऽपि मात्स्यिको ग्राममण्डपम् ।
उच्चावचविलासानां कितवानामुपाश्रयम् ॥ ३६ ॥

जुहुग्रामे यथान्यत्र मद्यपानं यथेच्छया ।
सेव्यते स्म प्रजाकूटैर्विशेषेण मधूत्सवे ॥ ३७ ॥

अथाचिराद्गणुश्चापि मात्स्यकैर्मिलितोऽभवत् ।
मद्यविक्रयिभिश्चान्यैर्विचेष्टास्पर्धिभिः परम् ॥ ३८ ॥

ततः केचिन्मदोन्मत्ताः कस्यचिद्वृद्धिजीविनः ।
ग्रामीणाः समगच्छन्त रंगुनाम्नो गृहाङ्गणे ॥ ३९ ॥

अहमस्मिन् जुहुग्रामे सर्वैरापि पुरस्कृतः ।
धनाढ्योऽहं सुवेषोऽहमिति रंगुरकत्थत ॥ ४० ॥

लिप्तः सुगन्धतैलेन मुद्रावलयमण्डितः ।
कथालापं सदा कुर्वन् स्वाभिमानमदर्शयत् ॥ ४१ ॥

मद्यपानेन मत्तोऽयमाख्याति स्मात्मना कृताः ।
गोपीधीवरपत्नीषु नानाशृङ्गारचेष्टिकाः ॥ ४२ ॥
कुसीदकमसुं द्रष्टमाद्विक्षन्मात्स्यको गणुः ।
प्रायेण तस्य संपर्कादात्मानं च न्यवारयत् ॥ ४३ ॥
तद्दिने तु गणुर्मत्तो निरर्गलमधूत्सवे ।
घूर्णमानोऽगमद्रंगोर्गृहं सहचरैः सह ॥ ४४ ॥
अथ प्राप्तेषु मित्रेषु स्वगेहं स कुसीदकः ।
आतस्तार कुथां शीघ्रं गौरवेण गृहाङ्गणे ॥ ४५ ॥
आसिच्य मृद्घटात्ताम्रभाजनेषु सुरां ततः ।
पातुमामन्त्रयामास सुहृदो हस्तसंज्ञया ॥ ४६ ॥
पीतहृष्टोपविष्टेषु मण्डलीभूय सर्वतः ।
निजानुभवमाचख्यौ शृङ्गाररससंभृतम् ॥ ४७ ॥
गर्वेण जल्पतो रंगोर्गूढवैरमहर्षिणः ।
मुखं बभूव सोल्लासं भविष्यद्विजयादिव ॥ ४८ ॥

कुचेष्टितं निरीक्ष्यास्य जातामर्षोऽभवद्गणुः ।
प्रत्युत्तरं च सावज्ञस्तन्मतं विब्रुवन् ददौ ॥ ४९ ॥
पिधेहि भो दुराचार दुर्मुखं ते निरर्गलम् ।
अलं विकत्थनैरोभिर्मृषावादैश्च जल्पितैः ॥ ५० ॥
इत्युक्ते मिलितास्त्वन्ये प्रहासं चक्रिरे नराः ।
कुस्मितश्च ततो रंगुः पुनराह विकत्थनः ॥ ५१ ॥
मदुक्तौ किं न विश्वासस्तर्हि रे वध्यतां पणः ।
इत्याह च्छोटिकां दत्वा कुसीदो गणुमुद्धतः ॥ ५२ ॥
पणितेन न मे कार्यमित्युक्तो रंगुरब्रवीत् ।
सावज्ञमन्दहासेन ब्रूहि दीव्यसि किं न वा ॥ ५३ ॥
आलोक्य क्षणमेवासौ कटिबन्धगतं पणम् ।
स्वहस्तेन परामृश्य गणुरात्मन्यचिन्तयत् ॥ ५४ ॥
जयं प्राप्स्यामि चेद् द्यूते क्रेष्याम्यहमुपायनम् ।
प्रियार्थमिति संचिन्त्य तथेति गणुरब्रवीत् ॥ ५५ ॥

दासस्यानुमतिं दृष्ट्वा मिलिता इतरे जनाः ।
संमतिं दर्शयामासुः स्वयं च सह देवितुम् ॥ ५६ ॥
अपि जानीथ मित्राणि सप्ताहेऽस्मिन्मयार्जितम् ।
अधिकं मासलभ्यांशाद् धनमर्थप्रयोगतः ॥ ५७ ॥
इति वार्धुषिको रंगुः कत्थमानो मदोद्धतः ।
नाणकैः संभृतं कोशं सञ्चणत्कारमामृशत् ॥ ५८ ॥
वयस्याः पञ्च तस्यान्ये नैव किंचिद्बभाषिरे ।
न सेहे तु गणोरात्मा रंगोरतिविकत्थनम् ॥ ५९ ॥
तथापि न शशाकैनं विरोद्धुं धनिकं तु सः ।
निर्गुणोऽपि जनः सभ्यैः शङ्क्यते हि धनान्वितः ॥ ६० ॥
अस्ति रत्नद्वयं चान्यन्महार्हं तच्च दैवतः ।
मदीयं भवितेत्याह रंगुर्गूढार्थगर्भितम् ॥ ६१ ॥
न चैतत्कुहकं वाक्यं न गणुः सारतोऽग्रहीत् ।
सुस्पष्टमस्य भावार्थं मनसैव व्यचिन्तयत् ॥ ६२ ॥

वृणीते दुर्जनं लक्ष्मीरिति जल्पन् गणुः स्वयम् ।
नाणकान् कटिसम्बद्धानुन्मुमोच शनैः शनैः ॥ ६३ ॥

तमन्येष्वनुकुर्वत्सु पृच्छति स्म कुसीदकः ।
अपि मामनुजानीथ पणं बन्धुं त्रिशास्त्रिशः ॥ ६४ ॥

इति साडम्बरं जल्पन्नपश्यदवहेलया ।
स्तोकशः स्थापितान् षड्भिर्नाणकानक्षदेवकैः ॥ ६५ ॥

तथेत्युक्ते नरैः षड्भिरेकमत्येन वार्धुषिः ।
स्वयमादौ प्रचिक्षेप लीलयैव स पाशकान् ॥ ६६ ॥

अथारम्भे गणुर्दिष्ट्या संप्राप्य विजयश्रियम् ।
कुशलो न चिरादेव लेभे रूप्यकविंशतिम् ॥ ६७ ॥

क्षणमात्रेण संपाद्य मासतोऽप्यतिदुर्लभम् ।
अद्भुतेन स्वभाग्येन जालिको विस्मितोऽभवत् ॥ ६८ ॥

सोमाश्चितो गणुर्गृह्णन् द्यूतेनावजितं धनम् ।
ध्यायति स्म मियायै मे सर्वमेतद्भविष्यति ॥ ६९ ॥

अथ कोशात्समादाय रंगुर्नाणकपूलिकाम् ।
मित्रैः सह पुनः पानं सिषेवे कामचारतः ॥ ७० ॥
द्यूतेऽथ पुनरारब्धे ।जित्वा भूयोऽपि मात्स्यकः ।
बभूव परमानन्दविवशो भाग्यलाभतः ॥ ७१ ॥
दृष्ट्वा गणोर्महाहर्षमब्रवीत्स कुसीदकः ।
दीव्यामः सुहृदो भूयः साहसे श्रीर्यतः स्थिता ॥ ७२ ॥
इत्युक्ते रंगुणाऽप्यन्ये नष्टमर्थं जिगीषवः ।
मुहूर्तं चिन्तयामासुः किन्तु नैवानुमेनिरे ॥ ७३ ॥
गणुश्च निर्जितं द्यूते वित्तं यत्नाद्विरक्षिषुः ।
प्रत्याख्यादबाहुमुद्यम्य नवं रंगोरभिग्रहम् ॥ ७४ ॥
कोशस्थं मे धनं नष्टं वस्तु किञ्चित्तु तिष्ठति ।
इति न्यवेदयद्रंगुः खेदादव्यक्तमालपन् ॥ ७५ ॥
अथ यावदसौ कोशे हस्तमाधाय मार्गति ।
तावदन्ये स्म वीक्षन्ते कौतुकात्तद्विचेष्टितम् ॥ ७६ ॥

उद्धार ततो रंगुः स्वकोशात्कुहकस्मितः ।
एकं विचित्रकेयूरं गजदन्तेन मण्डितम् ॥ ७७ ॥
अथ हस्तगतं रंगोरवलोक्याक्रंदं गणुः ।
सक्तदृष्टिरनालापो विवर्णश्च स्थितोऽभवत् ॥ ७८ ॥
विक्रयोद्घोषकेणेव रंगुणोद्यम्य दर्शितम् ।
तत्र केयूरमालोक्य कश्चिदभ्यागतोऽब्रवीत् ॥ ७९ ॥
दृष्टिदोषनिरासाय जाने मातामही मम ।
अधारयत्पुरानेन सदृशं दान्तमङ्गदम् ॥ ८० ॥
अथ श्लाघापरो रंगुः साभिमानोऽब्रवीद्वचः ।
कयाचिद्ग्रामसुन्दर्या प्रीत्येदं हि ममार्पितम् ॥ ८१ ॥
बहूनि चान्यवस्तूनि ध्रुवं सा मे प्रदास्यति ।
मनाक् प्रतीक्ष्यतां सर्वं ज्ञास्यते न चिरादिति ॥ ८२ ॥
तदालोक्य गणुः क्रोधादुत्पित्सुरिव वेगतः ।
गलनिष्पीडनेनास्य हर्तुमैच्छत्तदङ्गदम् ॥ ८३ ॥

तथापि संहरन् रोषं जिगीषुर्द्यूत एव सः ।
अब्रवीत्परुषं वाक्यमवलिप्तं कुसीदकम् ॥ ८४ ॥
अलं दर्पेण ते रंगो केयूरस्य कृते पणम् ।
करिष्ये जितसर्वस्वमेहि दीव्याव पाशकैः ॥ ८५ ॥
अतिसाहसमेवासीद् गणोरेतद्विचेष्टितम् ।
अर्थलिप्सुर्न किं कुर्यान्मत्सराद्विवशो जनः ॥ ८६ ॥
अथैवं गणुनाहूतो निसर्गाद्द्यूतलम्पटः ।
क्रीडितुं तेन भूयोऽपि प्रतिपेदे कुसीदकः ॥ ८७ ॥
अथ द्यूतमुपक्रम्य क्षिपन्तौ पाशकानुभौ ।
अन्ये विलोकयन्ति स्म नष्टवित्ताः सकौतुकम् ॥ ८८ ॥
द्यूतावजितवित्तार्धं हारयित्वाऽचिराद्गणुः ।
कोपारुणितनेत्रोऽपि दीव्यति स्मावधानतः ॥ ८९ ॥
रंगुस्तु नष्टपूर्वं स्वं निर्जित्य निखिलेन सः ।
बभूव परमानन्दपरिप्लुतश्च गर्वितः ॥ ९० ॥

अथ यावच्चकारासौ द्यूतलब्धस्य संग्रहम् ।
आश्चर्यवचनोद्गारमकरोत्तावदेककः ॥ ९१ ॥

अहो गणोर्वशे पूर्वं यदासीद्रूप्यकद्वयम् ।
तदप्यस्याधुना नष्टं जातश्चायमाकिञ्चनः ॥ ९२ ॥

अपि भूयः स्वभाग्यस्य कारिष्यासि परीक्षणम् ।
ऋणं दास्यामि ते नूनमिति पप्रच्छ वार्धुषिः ॥ ९३ ॥

मा तावदलमेतेन द्यूतेनेति स्खलद्वचाः ।
गणुर्भूयः पिबन्मद्यं संसिक्तचिबुकोऽब्रवीत् ॥ ९४ ॥

ततो घर्घरकण्ठोऽसौ प्रक्षिप्य भुवि भाजनम् ।
निर्भाग्यः प्राङ्गणाद्गंगोरपदुद्राव वेगतः ॥ ९५ ॥

क्रोशार्धमन्तरैवासीत्कुटीरं मत्स्यजीविनः ।
क्रोधान्धस्य तु भाति स्म तदेवातिविदूरगम् ॥ ९६ ॥

अथो गृहाङ्गणं प्राप्य द्वारदेशे स्खलत्पदः ।
आत्मानमतियत्नेन ररक्ष पतनाद्भुवि ॥ ९७ ॥

शून्यभूतेऽग्रिमे कोष्ठे सन्ध्याया मन्दरश्मयः ।
प्रविश्य विलिहन्ति स्म च्छायाः कोणावलम्बिनीः ॥ ९८ ॥
भार्यामाह्वातुकामोऽपि सहसा बद्धवाग्भवन् ।
गर्भागारमगात्तूर्णं गणुः परमदुर्मनाः ॥ ९९ ॥
दीपमादीपयन्ती सा बभाषे विस्मिता पतिम् ।
अहो क्षिप्रं समायातः कथमेवं भवानिति ॥ १०० ॥
अपि भग्नोद्यमासि त्वं मत्तो विश्वासघातिनि ।
इत्यपृच्छद्गणुः क्रोधात्कम्पमानः सगद्गदम् ॥ १०१ ॥
गन्धं मद्यस्य जिघ्रन्ती पश्यन्ती च गणोर्मुखम् ।
पप्रच्छ किं नु संवृत्तमिति राधा स्मिताननना ॥ १०२ ॥
क्रोधेन विकृताकारं मुखमस्यावलोक्य सा ।
मद्यपानेन मत्तोऽयमिति स्पष्टमतर्कयत् ॥ १०३ ॥
रुद्धवाक्प्रसरः कण्ठे स्खलन् पप्रच्छ तां गणुः ।
व्यभिचारे कदारभ्य प्रवृत्तासि कुलान्तके ॥ १०४ ॥

व्याजेन हृदयव्याधेर्भूत्वा मे करुणास्पदम् ।
अनुरंगं प्रसक्तासि सतीव तु विचेष्टसे ॥ १०५ ॥
आशु विज्ञाय सा राधा पैशाचक्रोधकारणम् ।
अस्पष्टां कुर्वती संज्ञां संबभूव पराङ्मुखी ॥ १०६ ॥
अथ स्थित्वा पुरस्तस्याः प्रचलन्तीं निवारयन् ।
जगर्ज गणुरत्युच्चैः किमये मां न भाषसे ॥ १०७ ॥
न तु सा वचसा प्रादादुत्तरं स्मितमन्तरा ।
यत्स्मितं मात्स्यिको मेने तिरस्कारविजृम्भितम् ॥ १०८ ॥
किं न जल्पसि दुर्वृत्ते इति पृष्टा पुनः पुनः ।
वस्त्राञ्चलेन बाहुं सा प्रावृणोद्दक्षिणेतरम् ॥ १०९ ॥
तदाचेष्टितमालोक्य प्रससर्प गणुर्जवात् ।
सहसा चाम्बरं बाहोस्तदीयमुदपाटयत् ॥ ११० ॥
अथ बाहौ गृहीत्वा तां दर्शयन् रौप्यमङ्कदम् ।
किमिमित्तामिदं ब्रूहि धृतामित्यब्रवीत्कुधा ॥ १११ ॥

जनन्याः स्मरणायैव मयेदं धृतमञ्जदम् ।
इत्याख्यान्तीं स तामाह क्व नु मे दान्तमञ्जदम् ॥ ११२ ॥
इति तां साग्रहं पृच्छन्नाक्रोशंश्च पुनः पुनः ।
करे निष्पीडयामास मग्नमन्दस्वरां मुहुः ॥ ११३ ॥
किमर्दयासि मां नाथ मुञ्च मां चेष्टितैरलम् ।
इत्युवाच परं राधा पीडिता मन्दहासिनी ॥ ११४ ॥
मत्तस्य लालनार्थं मे मन्दहासं व्यनक्ति सा ।
इतीव मन्यते स्मासौ भृशं क्रुद्धोऽपि चेतसि ॥ ११५ ॥
हृदये तु परासक्ता नूनमेषेति भावना ।
तत्तच्चिन्तयमानं तं बाधते स्म निरन्तरम् ॥ ११६ ॥
राधिकायाश्च वृत्तेन द्विगुणीभूतसंशयः ।
अवतस्थे चिरं तूष्णीमावेगादीर्घमुच्छ्वसन् ॥ ११७ ॥
यया यया स सस्मार रंगुणा प्रस्तुतां कथाम् ।
तया तया हृदि क्रोधवह्निर्जज्वाल वेगतः ॥ ११८ ॥

मदीयं देहि मे धूर्ते केयूरमिति तां गणुः ।
निर्दयं ताडयामास गलहस्तिकया नुदन् ॥ ११९ ॥
अथातिदीनमाक्रन्द्य प्रस्खलन्ती पपात सा ।
सहसैव निरुच्छ्वासा बभूव च तपस्विनी ॥ १२० ॥
तदीयः करुणाक्रन्दः शशंसार्तिकरीं कथाम् ।
भग्नाशाया विनष्टस्य जीवलोकसुखस्य च ॥ १२१ ॥
अथ जल्पन् दुरुक्तानि व्यपनीय च शीर्षकम् ।
गणुः क्रोधाद् बहिस्तूर्णं निर्जगाम गृहाङ्गणम् ॥ १२२ ॥
नानास्मृतिमहावर्तभ्रमदाकुलमानसः ।
अङ्गणेऽतिष्ठदेकाकी चिराय परिचिन्तयन् ॥ १२३ ॥
अवज्ञयत मामेषा वसन्त्यपि गृहे मम ।
इति चिन्तयतस्तस्य पुनः क्रोधोऽभ्यवर्धत ॥ १२४ ॥
प्रतारितोऽस्मि मूढोऽहं भार्यया नित्यरुग्णया ।
इति ध्यायन्गणुस्तीव्रं मनसा पर्यदूयत ॥ १२५ ॥

अस्तं गते ततः सूर्ये होलिकोत्सवडम्बरः ।
मृदङ्गवेणुनिर्घोषैः सह क्षीणोऽभवच्छनैः ॥ १२६ ॥
अथ निश्शब्दभूतेषु मत्तेषूत्सवकारिषु ।
घण्टानादोऽर्चनाशंसी शुश्रुवे देवमन्दिरात् ॥ १२७ ॥
अचिरात्माङ्गणद्वारमुद्घाट्य सहसार्भकः ।
लाक्षाम्बुसिक्तसर्वाङ्गो विशति स्म स्मिताननः ॥ १२८ ॥
आह्वयत्पितरं बालः सानन्दो बालभाषया ।
गणुस्तु भ्रुकुटिं बध्द्वा तमपश्यन्निरुत्तरः ॥ १२९ ॥
बालोऽथ दष्टजिव्हः सन् भयादिव तमब्रवीत् ।
श्वः प्रभाते लघूत्थाय तात नेष्यामि जालकम् ॥ १३० ॥
अपेह्यनिष्ट रे नीच न मे कार्यं त्वया सह ।
इत्युक्ते गणुना बालः परितो दृष्टिमाक्षिपत् ॥ १३१ ॥
उवाच पितरं तात रहस्यं किमु बुध्यसे ।
शृणु वच्मीति तत्कर्णे मन्दं किमपि सोऽब्रवीत् ॥ १३२ ॥

श्रुत्वापि बालकस्योक्तिं गणुर्निर्वचनः स्थितः ।
तच्चित्तं हि विकल्पौघे मग्नोन्मग्नमभूद्भृशम् ॥ १३३ ॥
क्षणं निरीक्ष्य बालोऽथ बभाषे पितरं पुनः ।
कथयिष्यामि ते किंचिन्न चेद्वक्ष्यसि मातरम् ॥ १३४ ॥
पुनः शङ्काकुलो भूत्वा तर्जयन् पाणिनार्भकम् ।
गणुराह वटो यच्चं वेत्सि तद् ब्रूहि सत्वरम् ॥ १३५ ॥
कुत्राम्बेति पुनः पृष्टः कोष्ठागारमदर्शयत् ।
अर्भकश्च द्रुतं गत्वा तदन्तः प्रविवेश सः ॥ १३६ ॥
अथ पोटलिकाहस्ते दारके प्रत्युपागते ।
इतस्तामाशु देहीति गणुः प्रासारयत्करौ ॥ १३७ ॥
जनकायार्भको दत्वा पोटलीं तामवोचत ।
पश्य हे तात पश्यास्यां पोटल्यां किं नु वर्तते ॥ १३८ ॥
अथ यावद्गणुः शीघ्रं पोटलीं तामपावृणोत् ।
तदन्तर्गतमालोक्य चकम्पे तस्य मानसम् ॥ १३९ ॥

तत्रासीदेकमुष्णीषं नूतनं वस्त्रवेष्टितम् ।
यत्प्रेक्ष्य हृदयं तस्य संशयावर्तमाविशत् ॥ १४० ॥
अथ हस्तं न्यधाद्यावन्मात्स्यिकः पोटलीतले ।
तावदस्याङ्गुली पत्रखण्डमेकं परामृशत् ॥ १४१ ॥
तदुद्धृत्य सपद्येव प्रेक्षमाणः समुत्सुकः ।
अपावृत्य च लेखार्थमादरेण पपाठ सः ॥ १४२ ॥
भूतार्थस्य परिज्ञानं प्रादुरासीत्तदा हृदि ।
क्रोधरूक्षं च सद्योऽस्य प्रसादमगमन्मुखम् ॥ १४३ ॥
निक्षेपस्वीकृतेः पत्रं तदासीद्रङ्कुणार्पितम् ।
पुनः पुनः पठित्वैतद् बभूव गणुराकुलः ॥ १४४ ॥
हन्त मिथ्यापवादेन दूषिताऽनपराधिनी ।
मिया मे पशुनेवास्यां कृतं चात्याहितं मया ॥ १४५ ॥
हा हतोऽस्मि धिगेनं मां नीचानामधमाधमम् ।
इति पश्चाद्गणुस्तप्तः करुणं पर्यदेवयत् ॥ १४६ ॥

मियायाः परितोषार्थी कर्तव्यमनुचिन्तयन् ।
तस्थौ विलोक्यमानोऽसौ शिशुना बद्धदृष्टिना ॥ १४७ ॥
लब्धयुक्तिरिवास्फोट्य च्छोटिकां सहसा मुदा ।
मात्स्यिको निदधे शीर्षे नूतनं शीर्षवेष्टनम् ॥ १४८ ॥
मैवं तातेति बालेन निषिद्धोऽपि त्वरान्वितः ।
निवार्य तं गणुः पुत्रं प्रविवेश गृहं पुनः ॥ १४९ ॥
प्रदोषतिमिरेणाथ गर्भागारे हतप्रभे ।
भित्तयस्तत्र चित्राभिश्छायाकृतिभिरङ्किताः ॥ १५० ॥
गृहं निश्शब्दगम्भीरं श्मशानमिव भीषणम् ।
दैवमानुषयोर्वृत्त्योर्युद्धरङ्ग इवाबभौ ॥ १५१ ॥
अथ यावद्गणुस्तूष्णीं गर्भागारमुपागमत् ।
तावद्ददर्श निश्चेष्टां राधिकां पतितां भुवि ॥ १५२ ॥
सुप्तैषा किल निश्शङ्कमिति संचिन्तयन् गणुः ।
तदुपर्यवनम्यास्याः केशपाशं परामृशत् ॥ १५३ ॥

सोत्कण्ठमसुना राधा स्पृश्यमानाप्यनेकशः ।
आहूतापि प्रियालापैर्न चचाल मनागपि ॥ १५४ ॥
भयोपहतसर्वात्मा भाले तां संस्पृशन् गणुः ।
निष्पन्दशीतं तद्दृष्ट्वा वज्राहत इवाऽभवत् ॥ १५५ ॥
मन्ददीपप्रकाशेऽसौ प्रैक्षतास्या मुखाम्बुजम् ।
प्रशान्तमभिरामं च मीलितं कालनिद्रया ॥ १५६ ॥
पुष्पिका.—मद्यपस्य करे रत्नं न चिरायावतिष्ठते ।

इति क्षमायाः कृतिषु लोकवृत्ताख्यानमालायां कथापञ्चके दन्तकेयूरं नाम कथा चतुर्थी समाप्ता ।

॥ असूयिनी ॥

एकदा वासनग्रामे फाल्गुने शीतमारुतः ।
प्रवाति स्मोरुनिश्वासैरार्तवद् ध्वनिमुद्गिरन् ॥ १ ॥
उन्मत्तवद्धुनोति स्म द्वाराणि पटलानि च ।
ह्रस्वजीर्णकुटीराणां श्रितानां मत्स्यजीविभिः ॥ २ ॥
अर्धावृतगवाक्षाणां रन्ध्रेभ्यः श्रूयते स्म च ।
आसन्नवारिधेर्वीचिपिटलानां प्रतिध्वनिः ॥ ३ ॥
तत्कालमुटजे क्वापि तरुणी रेविकाभिधा ।
निषण्णाऽभूत्सुपर्णाख्यमात्स्यिकस्य कुटुम्बिनी ॥ ४ ॥
लोडयन्ती शनैर्दुग्धं दग्धमृण्मयभाजने ।
चिरोपयोगतः श्यामां चुल्लिकामधि संस्थिते ॥ ५ ॥
ग्रामेऽस्मिन्मात्स्यिका लोकाः पर्यहार्षुः प्रयत्नतः ।
प्रातः काले सुपर्णस्य भार्याया मुखदर्शनम् ॥ ६ ॥

रेवाऽसौ निरपत्यासीदत एवाशुभा मता ।
मुखावलोकनं चास्या दुःखदायीत्यभाव्यत ॥ ७ ॥
अतोऽभवन्निरानन्दा रेविका मन्दभागिनी ।
अनाहतैकतः पत्या श्वश्वा च क्लेशिताऽन्यतः ॥ ८ ॥
जननी जालिकस्यास्य जरठा गोपिकाभिधा ।
कुञ्चिताङ्गी क्वचित्कोणे शेते स्म तिमिरावृते ॥ ९ ॥
अथैकदा वधूमुच्चैः क्रोशन्ती साऽब्रवीद्वचः ।
किं कर्तुमुद्यतासि त्वं मदोषेऽस्मिन्नये वद ॥ १० ॥
तवाम्ब तनुजस्यार्थे पचामि क्षीरिकामहम् ।
सैषा हि रोचते तस्मै सायंकालीनभोजने ॥ ११ ॥
इति रेवा मृदूवाच धूमाकुलविलोचना ।
अजस्रधर्मनैरग्र्यैरार्द्रयोगात्प्रशाम्यतः ॥ १२ ॥
अथ सा कोपनाऽगर्जीत्किं ब्रूषे ननु ते शिशोः ।
मृतस्य न दशाहोऽपि व्यतीतो निरपत्रपे ॥ १३ ॥

निजाधरपुटं दृष्ट्वा निश्वसन्त्याह रेविका ।
पत्यादिष्टा पचाम्येतन्मा वृथा स्म भवेदिति ॥ १४ ॥
काङ्क्षितं तन्मयैवेति किं न वक्ष्यसि लोलुपे ।
नष्टे नष्टे तवापत्ये बुभुक्षा तेऽधिकाधिका ॥ १५ ॥
इति चुक्रोश वृद्धासौ शपन्ती तां दुरुक्तिभिः ।
निर्लिखन्ती नखैश्च स्वं लुलितं केशपाशकम् ॥ १६ ॥
बहुशः श्रुतपूर्वत्वाद्भर्त्सनानां किलेदृशाम् ।
मौनमालम्ब्य तिष्ठन्तीं वृद्धोवाच पुनः स्नुषाम् ॥ १७ ॥
न जाने कस्य हेतोस्त्वं भर्तव्या मम सूनुना ।
वन्ध्या कण्ठनिबद्धेव शिला सन्तापकारिणी ॥ १८ ॥
इत्युच्चैरभिगर्जन्त्याः श्यामलं वलिनं मुखम् ।
बभूव भीषणं गोप्या द्वेषावेगविघूर्णितम् ॥ १९ ॥
प्रत्युवाचाथ रेवा तां कम्पमाना सगद्गदम् ।
वन्ध्येति मां कुतो ब्रूषे सुवानामनुवत्सरम् ॥ २० ॥

इति सोत्थाय शंसन्ती गत्वा फलकसंनिधिम् ।
स्थालीमुद्धृत्य तत्रस्थां शून्यचित्ता न्यधात्पुनः ॥ २१ ॥
ननु जाने मृतासि परं भस्मीकृतं त्वया ।
निखिलं जातसन्तानं हतस्तन्यविषाग्निना ॥ २२ ॥
इत्युक्त्वा कासितुं वृद्धा प्रवृत्ताऽभूदतीव सा ।
रेवा च स्थापयित्वाग्रे पतद्ग्रहमपासरत् ॥ २३ ॥
किञ्चिदाश्वस्य भूयोऽपि वृद्धा परुषमब्रवीत् ।
गोधनं मेऽस्ति पुत्रस्य सन्तानस्त्वभिकाङ्क्षते ॥ २४ ॥
दीर्घं निश्वस्य यावत्सा तस्थौ रेवा निरुत्तरा ।
जातामर्षाऽब्रवीद्वृद्धा विद्धि नूनं वदामि ते ॥ २५ ॥
अन्विष्यामि तदर्थेऽहं शुभामन्यां वधूमिति ।
एतेन चकिता रेवा बभाषे तां सगद्गदम् ॥ २६ ॥
अपत्येषु विनष्टेषु ब्रूहि दोषोऽम्ब को हि मे ।
ज्ञात्वापि किं दुनोषि त्वं वृथा मां मन्दभागिनीम् ॥ २७ ॥

अथैनां गोपिकाऽवादीन्निरपत्यस्य जन्म धिक् ।
सुपर्णस्याहमिच्छामि सर्वथा पुत्रमौरसम् ॥ २८ ॥
किमिदं वाञ्छितं पत्युः प्रार्थये ब्रूहि तत्त्वतः ।
इत्ययाचत दीना तामुज्झान्तिस्फुरिताधरा ॥ २९ ॥
निस्संशयं सुपर्णोऽसौ सन्तानमभिकाङ्क्षति ।
पुरुषो न हि नारीव व्यनक्ति स्वमनोगतम् ॥ ३० ॥
ननु जानासि ते पार्श्वात्यथायं प्रपलायते ।
अहं वेद्मि कियद्द्वेष्टि त्वामसौ कुलनाशिनीम् ॥ ३१ ॥
इत्याख्याय प्रवृत्ताभूदवाच्यवचनैः स्नुषाम् ।
अभिशप्तुं पुनर्वृद्धा चोटयन्ती निजाङ्गुलीः ॥ ३२ ॥
आक्रोशावेशतो भूयः कासोत्कासार्दिताऽभवत् ।
सकम्पा जीर्णसर्वाङ्गी क्षणं च विवशा स्थिता ॥ ३३ ॥
तीव्रदुःखेन संतप्ता रेवा शीघ्रमबुध्यत ।
श्वश्रूदुर्वचनैः सिद्धमियं दृढनिश्चयम् ॥ ३४ ॥

स्वजन्मनः कथा दीना लिखिताभूत्तदानने ।
निष्प्रभं नयनद्वन्द्वं शोकावेगमसूचयत् ॥ ३५ ॥
सर्वोऽपि मुखभावोऽस्याः शंसति स्म निरास्थताम् ।
अवाच्यवचनैः श्वश्वा जनितां नित्यजल्पितैः ॥ ३६ ॥
वेतसोपमदेहायाः कृशाङ्ग्याः शिथिलाङ्गता ।
आत्मनो जीवयात्रायाश्चचक्षे दैवतन्त्रताम् ॥ ३७ ॥
रेवा ह्यादर्शभूतासीद् ग्रामेऽस्मिन्मत्स्यजीविनाम् ।
जनान् परिचिकीषन्ती कथाश्रवणलालसा ॥ ३८ ॥
नित्यं नैदाघसन्ध्यासु कथा अतिभयङ्करीः ।
पिशाचानां च दुर्गाया वृद्धः कश्चिदवर्णयत् ॥ ३९ ॥
चिन्तयन्त्या दिवारात्रं रेवायाः किल चेतसि ।
भयश्रद्धे तदाख्यानमतिमात्रमजीजनत् ॥ ४० ॥
शान्तकासा स्नुषामेनां जरठा साऽशपत्पुनः ।
धिगनिष्टे भव ध्वस्ता निरपत्यानिशाचरि ॥ ४१ ॥

अथ वायोः सशूत्कारं गर्जतश्छदिरन्ध्रतः ।
निर्घोषमधरीकृत्य जृम्भिते भर्त्सनध्वनौ ॥ ४२ ॥
पचन्त्याः सायमाहारं रेविकायाः करस्थिता ।
दर्वी कम्पितसर्वाङ्ग्याः सहसा हस्ततोऽभ्रशत् ॥ ४३ ॥
मन्दज्वालेऽथ संजाते वह्नौ रेवावनम्य सा ।
अतिमात्रं तमाध्मातुमारेभे चुल्लिकामुखे ॥ ४४ ॥
वह्निमेवं समीकृत्य गवाक्षस्यान्तिकं ययौ ।
चलाचलस्य वातेन धूमजालावृतस्य च ॥ ४५ ॥
बहिर्विलोकमाना सा लक्षयामास मात्स्यिकान् ।
मिलिताञ्जलधेस्तीरे कथकस्य समन्ततः ॥ ४६ ॥
मरुद्घोषविरामेषु शृणोति स्म क्वचित्क्वचित् ।
रोमाञ्चितवपू रेवा कथ्यमानं कथाद्भुतम् ॥ ४७ ॥
यदा तु न कथाऽश्रावि तदा स्तब्धेव सा स्थिता ।
गोपिकाया दुरुक्तानि चिन्तयन्ती पुनः पुनः ॥ ४८ ॥

ततश्चुक्रोश सा वृद्धा बोधयन्ती स्नुषां निजाम् ।
नष्टबालापि निर्लज्जे विहर्तुं किमिहोद्यता ॥ ४९ ॥
अकाण्डचकिता रेवा वृद्धायाः कुत्सितोक्तिभिः ।
विषशल्यमविद्धेव तस्याप्यवचना स्थिता ॥ ५० ॥
सहिष्णुता तु रेवाया भूयो भूयः परीक्षिता ।
परां कोटिं गतापि आसीन्न पर्याप्ताधुना किल ॥ ५१ ॥
सकम्पा भित्तिमालम्ब्य बाष्पधारां निगृह्णती ।
ययौ दीपयितुं दीपं नितरां दुर्मनायिता ॥ ५२ ॥
ज्योतिर्मन्दमदीपस्य प्रसरत्सर्वतो गृहे ।
भासयामास वृद्धाया वलिनं जीर्णमाननम् ॥ ५३ ॥
शापोक्तिभिरनन्ताभिरजस्रमुखरीकृतम् ।
क्षणादथ बहिः शब्दश्रवणाद्विरतस्वनम् ॥ ५४ ॥
परमुच्छ्वसिता भर्तुः प्रत्युत्थानचिकीर्षया ।
त्वरमाणागमद्देवा द्वारदेशं समुत्सुका ॥ ५५ ॥

जालभारं वहन् स्कन्धे सार्द्रपादूधरः करे ।
ऋजुहस्वशरीरोऽथ सुपर्णः माविशद्गृहम् ॥ ५६ ॥
निजवृत्तिपरो नित्यं मवीणो मत्स्यबन्धने ।
सहिष्णुर्निजभार्यायां जनन्यामतिवत्सलः ॥ ५७ ॥
भूरिसंग्रहसंतुष्टोऽब्रवीद्भार्यां स मात्स्यकः ।
संग्रहोऽद्यतनो भूयान् भविता लाभकारकः ॥ ५८ ॥
उपानहाविती देहि जलार्द्रे शोषयाम्यहम् ।
इत्युक्त्वा सा करात्पत्युरगृह्णात्पादुकाद्वयम् ॥ ५९ ॥
निक्षिप्य पार्श्वतो जालं निषण्णो मातुरग्रतः ।
सुपर्णः स्विन्नसर्वाङ्गो जननीमभ्यभाषत ॥ ६० ॥
स्मयमाना तु सा वृद्धा वर्तते स्म निरुत्तरा ।
पर्यवस्थापयन्त्यस्य व्यस्तशीर्षकगुच्छकम् ॥ ६१ ॥
अथोवाच परं प्रीतः करं जाले प्रवेशयन् ।
अम्ब मत्स्या मयाऽऽनीतास्त्वदर्थे बहुपेशलाः ॥ ६२ ॥

मत्स्यसृष्टिं ततो जालादपनीय सुपर्णकः ।
बभाषे रेविकामेतानम्बायै पच सत्वरम् ॥ ६३ ॥
तूष्णीं मत्स्यानगृण्हात्सा करात्पत्युर्यथोदितम् ।
क्षालयित्वा च तान् शीघ्रं न्यदधाच्चुल्लिकोपरि ॥ ६४ ॥
स मुहूर्तमथो तस्थौ करं मातुः परामृशन् ।
ततस्सत्वरमुत्थाय जालमादात्सुपर्णकः ॥ ६५ ॥
निर्गन्तव्यं पुनः किंवा त्वया भोजनमन्तरा ।
इत्यपृच्छत्पतिं रेवा बिभ्रती तस्य पादुके ॥ ६६ ॥
इमे खलु नवा एव विक्रेया मत्स्यकाः प्रिये ।
इयाँल्लाभो न मे नित्यमित्युक्त्वा चलति स्म सः ॥ ६७ ॥
तावच्च जननी प्राह तुदन्ती वाक्छरैः स्नुषाम् ।
नित्यलाभो भवेत्पुत्र यदि भार्या सुलक्षणा ॥ ६८ ॥
अथ पत्यौ स्थिते तूष्णीं प्रतिपत्तिविमूढवत् ।
बभूवोद्विग्नसम्भ्रान्ता रेवा साश्रुविलोचना ॥ ६९ ॥

अथ तूर्णं प्रतिष्ठासुः सुपर्णः समभाषत ।
अन्धकारागमात्पूर्वं वरं गच्छामि चेदिति ॥ ७० ॥
इत्युक्त्वा त्वरमाणोऽसौ निर्जगाम गृहाद्बहिः ।
गायन्नान्दीलिकागीतं गीतपूर्वं निजाम्बया ॥ ७१ ॥
अचिराद्गतवत्यस्मिन् मात्स्यिके वृत्तितत्परे ।
कङ्कणानां झणत्कारः श्रयते स्म गृहाद्बहिः ॥ ७२ ॥
दुर्गयाऽऽगतया भाव्यमिति रेवा व्यतर्कयत् ।
सा हि तस्याः सखी बाल्यात्प्रातिवेश्या बहुप्रजा ॥७३॥
कुटीरं प्रविशन्त्येव दुर्गां पप्रच्छ रेविकाम् ।
अयि किं नागता श्रोतुं कथामब्धितटे सखि ॥ ७४ ॥
द्वादशाहो व्यतीतोऽद्य बालकस्य मृतस्य ते ।
त्वदागमे निषधः क इति दुर्गावदत्पुनः ॥ ७५ ॥
उद्धावनमनिच्छन्ती श्वश्रूक्रोधस्य सा पुनः ।
मौनं धारयितुं सख्यै संज्ञामकृत रेविका ॥ ७६ ॥

रेवां दुर्गाब्रवीत्कर्णे श्वश्रूभयनिपीडिताम् ।
वयमद्य शिलीभूता भयानककथाश्रवात् ॥ ७७ ॥
वदन्त्येवं ससंरम्भा भयकम्पाकुलेव सा ।
क्षणत्कङ्कणहस्तेन स्वकपोलं परामृशत् ॥ ७८ ॥
अवनम्याग्रतो रेवा प्रेक्षमाणा सखीं निजाम् ।
कथाया वस्तु जिज्ञासुरपृच्छन्नेत्रसंज्ञया ॥ ७९ ॥
कालिकायाः कथां वृद्धो वर्णयामास भीषणाम् ।
जीवन्नरबलिस्तस्यास्तोषणायेति चाब्रवीत् ॥ ८० ॥
अथ तूष्णीं मुहूर्तं ते तिष्ठतः स्माङ्गने उभे ।
दुर्गा तावदुपासर्पन्भित्तिदेशं कुतूहलात् ॥ ८१ ॥
उपेत्य फलकं भित्तौ ताम्रभाजनसंभृतम् ।
अहो कियन्ति भाण्डानीत्यवोचत्सा सविस्मयम् ॥ ८२ ॥
सुमृष्टानि पात्राणि पश्यन्ती बद्धलोचना ।
द्वित्राण्यपि न मे हन्त सन्तीदृंशीत्यवोचत ॥ ८३ ॥

अथ तीव्रस्वरेणासौ वृद्धा चुक्रोश कोणतः
न क्रीणीषे स्वयं कस्मात्परभाजनलोलुपे ॥ ८४ ॥
कथमीदृशि पात्राणि क्रीणीमहि वयं वत ।
प्लवसाधनमस्माकं नास्ति भद्रे यथा हि वः ॥ ८५ ॥
विन्दते यावदेकाहे भाग्यवानात्मजस्तव ।
सप्ताहेनापि मे भर्ता न तावल्लभते धनम् ॥ ८६ ॥
इत्यभाषत दुर्गासौ कृपणं मात्स्यकाङ्गना ।
क्षुधार्तबहुलापत्या प्रतिवेशनिवासिनी ॥ ८७ ॥
आढ्यानामपि नो दुर्गे न सुखं विद्यते क्वचित् ।
इति मोवाच तां रेवा विहीना पुत्रसम्पदा ॥ ८८ ॥
अये मनाक् प्रतीक्षस्व न खलु त्वं जरां गता ।
इति दुर्गाभिपश्यन्ती भाण्डं रेवामसान्त्वयत् ॥ ८९ ॥
रेवायामथ मुञ्चन्त्यां तैलबिन्दून् प्रदीपके ।
यथा दीपस्य पुष्टस्य वर्धते स्म शनैः शनैः ॥ ९० ॥

बाह्यतोऽथ कुटीरस्य लघुः पादध्वनिःश्रुतः ।
सहसा द्वारमुद्घाट्य प्राविशच्चार्भकद्वयम् ॥ ९१ ॥
बालकौ तौ हि दुर्गाया जीर्णकर्पटधारिणौ ।
चूषन्तौ वर्तिकाखण्डमम्बामाह्वयतां निजाम् ॥ ९२ ॥
आगमिष्याम्यहं तूर्णं पुरस्ताद्गच्छतं गृहान् ।
इत्युच्चैर्दुर्गया प्रोक्तावपि बालौ न चेलतुः ॥ ९३ ॥
तद्दर्शनेन रेवाया उत्पपातेव मानसम् ।
बद्धदृष्टिश्च सा बालौ व्यलोकयत सस्पृहम् ॥ ९४ ॥
ज्यायान् बालस्तयोर्मध्ये बभाषे शैशवार्जवात् ।
अपूपं देहि नौ मातः परमावां बुभुक्षितौ ॥ ९५ ॥
पिधेहि मुखरं वक्त्रमनयोर्हतबालयोः ।
इति चुक्रोश सा वृद्धा निर्दया निजकोणतः ॥ ९६ ॥
देहि नौ पिष्टकं मातरितिनिर्बन्धकारिणौ ।
तस्थतुश्चालयन्तौ तौ सनार्दं द्वारशृङ्खलाम् ॥ ९७ ॥

इमौ नित्यक्षुधार्तौंस्तथ्यपलौ दुष्टचेष्टितौ ।
अद्यैव स्नापितौ चापि संवृत्तौ मलिनौ पुनः ॥ ९८ ॥
अहो कथमिमौ बालौ स्थापयेयं सुनिर्मलौ ।
इति दुर्गा विषीदन्ती निरास्थेव जगाद सा ॥ ९९ ॥
निशम्य करुणं वाक्यं रेवा द्वारमुपागमत् ।
उपेत्य चार्भकौ दीनौ परं प्रेम्णा परामृशत् ॥ १०० ॥
पश्य तावदिदं मातः केनाप्यावां निपातितौ ।
इति जानुगतं किञ्चिद् दर्शयामासतुर्व्रणम् ॥ १०१ ॥
दारकौ प्रेक्षमाणायाः करुणाप्लुतचक्षुषा ।
आतिथ्यस्य चिकीर्षास्या रेवायाः हृदयेऽजनि ॥ १०२ ॥
आगच्छतामितस्तावद् दुग्धं दास्यामि वामिति ।
वदन्ती बालकौ रेवा पुरः प्रासारयत्करौ ॥ १०३ ॥
श्रुत्वेदं जरठाऽवोचद्राक्षसीयमहो वधूः ।
निपात्य या निजापत्यं परापत्यं परीप्सति ॥ १०४ ॥

जरतीं प्रेक्षमाणाऽथ दुर्गा प्रोवाच कोपतः ।
रेवे निर्गच्छतामेतौ मा पुनस्तौ प्रवेशय ॥ १०५ ॥
अपयातमितः शीघ्रं नो चेत्ताडनमाप्स्यथः ।
इति निष्कास्य तौ बालौ दुर्गा द्वारेऽर्गलां ददौ ॥ १०६ ।
निसर्गमातृवात्सल्यप्रेरिता रेविकाथ तौ ।
पुनरानेतुकामापि परतन्त्रा न चाशकत् ॥ १०७ ॥
अथ प्रत्यागता दुर्गा भित्तिगं फलकं पुनः ।
प्रशंसितुं प्रवृत्ताऽभूद् भाजनानि पृथक् पृथक् ॥ १०८ ॥
अचिरादङ्गणं गत्वा रेविका व्यापृताऽभवत् ।
विचये शुष्कमत्स्यानामास्तृतानां कुथोपरि ॥ १०९ ॥
साहाय्यं कर्तुकामासौ सर्वां दुर्गान्वगाद्बहिः ।
आकृष्टा मत्स्यगन्धेन जिघत्सुरभवद्भृशम् ॥ ११० ॥
यावद्वेचयितुं रेवा पूर्णं पूर्णं करण्डकम् ।
प्रविवेश गृहं तावन्मत्स्यान् दुर्गाऽक्षिपन्मुखे ॥ १११ ॥

अथ चास्तमिते भानौ गिरयो दूरवर्तिनः ।
लक्ष्यालक्ष्याः शनैर्भूत्वा विशन्ति स्म नभस्तलम् ॥ ११२ ॥
व्यलम्बन्ताम्बुधेस्तीरे स्त्रियो बन्धुमतीक्षया ।
काश्चिज्जालानि बध्नन्त्यः पाययन्त्यः शिशून् पराः ॥११३॥
करण्डकेऽन्तिमे पूर्णे दुर्गावोचत्सखीं निजाम् ।
एहि तावत्कुटीरं मे मा शुचः शुभमाप्स्यसि ॥११४॥
दोलायितमना दृष्टिं चारयन्ती गवाक्षतः ।
रेवा ददर्श संसुप्तामन्तः श्वश्रूमनाकुला ॥ ११५ ॥
श्रूयते स्म तदोच्चण्डं वृद्धाया घर्घरायितम् ।
मारुतस्येव शूत्कारो वेणुकान्तारमध्यतः ॥ ११६ ॥
क्षणमेकं विचिन्त्याथ रेवा विश्वासमागता ।
द्वारं बध्द्वा ततः शीघ्रं सह सख्या विनिर्ययौ ॥ ११७ ॥
उभौ यावदुपायातामचिरेण गृहान्तिकम् ।
बालकावभ्यधावताम् ॥ ११८ ॥

अथ दुर्गाऽऽह पश्यन्ती खादन्तौ तिन्त्रिणीफलम् ।
पश्योदरम्भरी एतौ बालौ दुर्ललितौ सखि ॥ ११९ ॥
अखाद्यमनयोः किञ्चिद्रेविके नहि विद्यते ।
इति दुर्गा वदन्ती सा गृहद्वारमपावृणोत् ॥ १२० ॥
गेहमासील्लघीयस्तद्रोविकायाः कुटीरतः ।
मध्ये यदीयकोष्ठस्य शिशुदोला स्थिताऽभवत् ॥ १२१ ॥
तस्यां वसनदोलायामशेतैकः स्तनन्धयः ।
चालयंश्चरणौ नित्यमाचूषंश्च कराङ्गुलिम् ॥ १२२ ॥
क्रीडन्ती दारिका चैका पंषण्या भूतले स्थिता ।
बिभ्रती च करेऽपूपं मक्षिकावलिसंवृतम् ॥ १२३ ॥
यावच्चादीपयद्दुर्गा दीपं तावदुपाविशत् ।
दारिकापार्श्वतो रेवा चुम्बन्ती तां पुनः पुनः ॥ १२४ ॥
दृष्टिदोषनिरासाय न किं निक्षिपसेऽञ्जनम् ।
अर्भकाणां ललाटे च कपोले चापि लोचने ॥ १२५ ॥

इति पप्रच्छ रेवा तां स्ववयस्यां कुतूहलात् ।
धारयन्ती निजोत्सङ्गे लालयन्ती च बालिकाम् ॥ १२६ ॥
न करोमीदृगाचारं तथाप्येतेऽर्भकाः स्वयम् ।
वर्धन्त इति तां दुर्गा साभिमानमिवाब्रवीत् ॥ १२७ ॥
आजन्मनोऽर्भकैर्दिष्ट्या व्याधिनामापि न श्रुतम् ।
इति भूयस्तया प्रोक्ते रवोऽभूद्दुर्मना इव ॥ १२८ ॥
ईर्ष्यया भृशदग्धा सा नितान्तव्याथिताऽभवत् ।
स्मरन्ती स्वार्भकान्नष्टान् यत्नतः पोषितानपि ॥ १२९ ॥
विविधानुपचारांश्च तत्कृते विहितांस्त्वया ।
जागरांश्च दिवारात्रं दैवान्निष्फलतां गतान् ॥ १३० ॥
अथ दुर्गाऽब्रवीद्भूयो महार्घत्वेऽपि वस्तुनः ।
क्रीणाम्येव यथाशक्यं बालेभ्यो भोज्यसञ्चयम् ॥ १३१ ॥
बालामेवाभिपश्यन्ती शून्यदृष्ट्या भृशाकुला ।
ध्यायन्ती च स्वदुर्दैवं तस्थौ रेवा निरुत्तरा ॥ १३२ ॥

आणकद्वयमूल्येन कथञ्चित्क्रीयते मया ।
बालापत्यकृते दुग्धमिति दुर्गा न्येवदयत् ॥ १३३ ॥
रेवा बालां समालिङ्ग्य प्राह दास्यामि तेऽन्वहम् ।
पात्रपूर्णं नवं दुग्धमस्ति नः पुष्कलं गृहे ॥ १३४ ॥
यदि ज्ञास्यति सा दैवाद् वृद्धा क्रुद्धा न किं भवेत् ।
पृच्छन्त्येवमसौ दुर्गा प्राचलच्चुल्लिकां प्रति ॥ १३५ ॥
उदयात्त्रिघटीपूर्वं न मे श्वश्रूः प्रबुध्यते ।
तावच्चाहं दुहे धेनूरित्यभाषत रेविका ॥ १३६ ॥
तदौदार्यवशीभूता दुर्गालिङ्ग्याब्रवीत्सखीम् ।
वाढं रेवे पयो नेतुमागमिष्यामि ते गृहम् ॥ १३७ ॥
धिग्ग्रामीणजनान् रेवे ये त्वामाहुरमङ्गलाम् ।
अवजानन्ति नित्यं च सुशीलां मन्दबुद्धयः ॥ १३८ ॥
अमङ्गलेति साम्रेडं जल्पन्ती रेविका वचः ।
मुहूर्तं चिन्तयार्तापि न्यग्रहीच्चित्तमात्मनः ॥ १३९ ॥

गच्छन्तौ रेवया सार्धं गृहमावर्तमानया ।
व्यलम्बेतां शिशू सख्या मोदकापणसंनिधौ ॥ १४० ॥
बालौ तदेव पश्यन्तौ भक्ष्यजातं बुभुक्षितौ ।
दृष्ट्वा सकरुणा रेवा सान्त्वयन्ती जगाद तौ ॥ १४१ ॥
हे बालौ युवयोरर्थं करिष्ये मोदकानहम् ।
प्रातश्च तान् प्रहेष्यामि युवयोर्मातृहस्ततः ॥ १४२ ॥
हेपिताविव तूष्णीं तौ क्षणमास्तां नताननौ ।
ततः प्रचेलतुर्यावद्रेवाया गृहमापतुः ॥ १४३ ॥
द्वारस्य शृङ्खलायां सा करं विन्यस्य रेविका ।
प्रातरायातु माता वामित्युवाच मृदुस्वरा ॥ १४४ ॥
अथ रात्रौ व्यतीतायां सुपर्णः प्रेरितोऽम्बया ।
पुनर्विवाहमुद्दिश्य रेवया सार्धमालपत् ॥ १४५ ॥
साश्रुनेत्रा सकम्पा च पतिं पप्रच्छ रेविका ।
अपि त्वं मयि न प्रीतो यदन्यां बोद्धुमिच्छसि ॥ १४६ ॥

सुपर्णोऽथ स्खलद्वाचा प्राहाम्बा पौत्रमिच्छति ।
स्थास्यसि त्वं तु गेहेऽस्मिन् प्रधाना गृहिणी प्रिये ॥१४७॥
ननु त्वमपि खेलन्तं गृहे बालं दिदृक्षसे ।
तेनाप्स्यावः परं सौख्यमिति भार्यामसान्त्वयत् ॥ १४८ ॥
मृतेरस्मदपत्यानामहमेवास्मि कारणम् ।
इति त्वमपि किं नाथ मन्यसे ब्रूहि तत्त्वतः ॥ १४९ ॥
इति सा कम्पमानाङ्गी सबाष्पा गद्गदाक्षरा ।
स्फुरदोष्ठा च पप्रच्छ परावृत्तकृशानना ॥ १५० ॥
स चाह तामिदं वक्तुं दौर्विकं कोऽहि शक्नुयात् ।
मनाक् प्रतीक्षणं तस्मादितोऽपि करवावहै ॥ १५१ ॥
संपीड्योष्ठपुटौ क्रोधात्तदावेगं निगृह्णती ।
रेवा पप्रच्छ भर्तारं कदा त्वं वोढुमिच्छसि ॥ १५२ ॥
यदि नौ भाविसन्तानस्तारिष्यति भयार्णवम् ।
पुनर्नोद्वाहयिष्येऽहमिति वाचमदात्पतिः ॥ १५३ ॥

विसृज्याथ तदालापं स तुच्छं विषयं यथा ।
कटे निपतितस्तूर्णं निद्रयापहृतोऽभवत् ॥ १५४ ॥
निशान्तेऽनन्दयल्लोकं प्रशान्तिः सर्वतोमुखी ।
दीपाश्च शून्यमार्गेषु क्षीयन्ते स्म शनैः शनैः ॥ १५५ ॥
पुरुषाकारधारिण्यश्छायाश्चित्राविचित्रकाः ।
मरुद्विधूतताला नामधोऽनृत्यन्नटा इव ॥ १५६ ॥
चिन्ताप्रचण्डवातेन क्षिप्यमाणाऽथ रेविका ।
गवाक्षस्यान्तिके तस्थौ पश्यन्तीव गृहाद्बहिः ॥ १५७ ॥
अहो कियन्ति सोढानि सङ्कटानि मया बत ।
न तुष्यति तथाप्येतद्दैवं धिगिति साऽशुचत् ॥ १५८ ॥
सहमानैव कष्टानि वृद्धायाश्छलितानि च ।
शुभमाशंसमानाऽग्रे दिवसानत्यवाहयत् ॥ १५९ ॥
नानास्मृतिमहावर्तभ्रमदाकुलमानसा ।
श्वश्रूद्वेषजमुद्देश्यं सानुबन्धमचिन्तयत् ॥ १६० ॥

उद्वहेद्यदि भूयोऽपि स्त्रियमन्यां सुपर्णकः ।
स्थातव्यं हि मया नित्यं दास्येव परतन्त्रया ॥ १६१ ॥
चिन्तयन्त्यपमानं सा सपत्नीजनहेतुकम् ।
आपादमस्तकं रेवा चकम्पे विकृताननाः ॥ १६२ ॥
अपि नाम कदाप्यस्माद् भवेत्कष्टाद्विमोचनम् ।
इति साऽऽशंसमानापि निराशाभवदन्ततः ॥ १६३ ॥
अथ साऽद्भुतमाख्यानं कालिकायाः सुदारुणम् ।
नरोपहारतः प्रीतिं तस्याश्च समचिन्तयत् ॥ १६४ ॥
एवमाध्यानतो भूयो नैराश्यहतचेतसः ।
संजज्ञे हृदये तस्याः संकल्पो बत दारुणः ॥ १६५ ॥
कालिका यदि संप्रीता भवेन्मानवयज्ञतः ।
न किं मे भाविसन्तानं कुर्यात्सा चिरजीविनम् ॥ १६६ ॥
कथन्नु घोरयज्ञेऽस्मिन् बल्यर्थं प्राप्नुयां नरम् ।
इति चिन्तयमानायाः सखीपुत्रौ स्मृतिं गतौ ॥ १६७ ॥

ताभ्यां प्रेषयितुं भक्ष्यं मया प्रागेव संश्रुतम् ।
अथ किं दुष्करं हन्त स्वमनोरथसिद्धये ॥ १६८ ॥
सुलभा सर्वथा सेयं धत्तूररसयोगतः ।
इति निश्चयमापन्ना जगामाग्रिमकोष्ठकम् ॥ १६९ ॥
कम्पमानकरा रेवा दीपयामास चुल्लिकाम् ।
विचेतुमथ धत्तूरं प्राङ्गणं निभृतं ययौ ॥ १७० ॥
चिराय कुर्वती भक्ष्यं धत्तूररसमिश्रितम् ।
परिश्रान्ताऽन्तिमे यामे किलिञ्जे शयिताऽभवत् ॥ १७१ ॥
नवदुग्धकृते सख्या ध्यायन्ती प्रातरागमम् ।
चिन्तावात्याभिराधूता रात्रिशेषमजागरीत् ॥ १७२ ॥
अथ सूर्योदयात्पूर्वं सुपर्णो निजवृत्तये ।
जालयष्टीं समादाय निर्जगाम कुटीरतः ॥ १७३ ॥
सुप्तायामेव वृद्धायां श्वसन्त्यां च सघर्घरम् ।
समाप्तदोहना रेवा सख्यै दुग्धं न्यधात्पृथक् ॥ १७४ ॥

अर्धयामं प्रतीक्ष्याथ सखीं रेवाऽङ्गणे स्थिता ।
तदागमस्य चिह्नं तु नाभवत्तद्दृष्टिगोचरे ॥ १७५ ॥
अथ सा घोरसंकल्पैस्तथात्यन्तवशीकृता ।
यथा भक्ष्यं च दुग्धं च स्वयमेव निनाय ताम् ॥ १७६ ॥
तस्याः संप्राप्तमात्रायाः सखीमन्दिरसंनिधिम् ।
मर्माभित्करुणाक्रन्दो हठात्कर्णपथं गतः ॥ १७७ ॥
नितान्तकम्पमानाङ्गी कथमप्यथ रोविका ।
कर्षन्तीव निजात्मानं द्वारभूमिं शनैरगात् ॥ १७८ ॥
देहलीं प्राप्तमात्रैव दुर्गामन्तर्ददर्श सा ।
क्रन्दन्तीं गाढमालिङ्ग्य वक्षसा ज्येष्ठमर्भकम् ॥ १७९ ॥
तस्याः पतिश्च जानुभ्यामानतोऽन्यशिशूपरि ।
दुर्दैवमात्मनो निन्दन्नातिष्ठद् बाष्पदूषितः ॥ १८० ॥
वर्तते स्म च दोलायां सुखसुप्तः स्तनंधयः ।
तदग्रजाऽन्यतः स्तब्धा तस्थौ वृत्तमजानती ॥ १८१ ॥

रूढमूलेव तिष्ठन्ती रेविका बद्धलोचना ।

अपृच्छदिव वृत्तान्तं सखीमवचनापि सा ॥ १८२ ॥

गतो मे बालको रेवे प्रथमः सकलोत्तमः ।

मृत्यून्मुखश्च हा हन्त कर्नीयानपि वर्तते ॥ १८३ ॥

अहो मे मन्दभागिन्याः पुत्रशोकोऽयमागतः ।

को वार्थोऽद्य मम प्राणैर्दुर्गातिं सखि पश्य मे ॥ १८४ ॥

दुःखार्तामिति शोचन्तीं दुर्गामालोक्य रेविका ।

यतमानापि तां वक्तुं सर्वथा न शशाक सा ॥ १८५ ॥

ग्रस्तावुभौ महामार्या बालकौ मम वत्सलौ ।

किं पापं मन्दभागिन्या कृतं निर्घृण हा विधे ॥ १८६ ॥

इति दुर्गानुशोचन्ती ताडयन्ती स्वमस्तकम् ।

अपाटयत्समुद्वेगादात्मनः केशपाशकम् ॥ १८७ ॥

रेवा तामभिपश्यन्ती शिलीभूतेव संस्थिता ।

इतिकर्तव्यतामूढा पापसंकल्पदूषिता ॥ १८८ ॥

त्वमेव घातुकी नूनं बालयोरनयोरिति ।
अन्तरात्मा समुद्भ्रान्तां क्षिपति स्म पुनः पुनः ॥ १८९ ॥
वर्तमानमपश्यन्ती लुप्तभूतार्थसंस्मृतिः ।
आशुनश्याद्विवेका च स्थिता सा दैवविप्लुता ॥ १९० ॥
तत्करादवसन्नाच्च न्यपतद्दुग्धभाजनम् ।
विकिरत्सर्वतो भूमौ तदन्तस्थं नवं पयः ॥ १९१ ॥
पृष्ठतः साऽवसीदन्ती सहसाक्रन्द्य कर्कशम् ।
अतिवेगात्ततो रेवा निश्चक्राम गृहाद्बहिः ॥ १९२ ॥
अथान्धेव समुद्रस्य तीरं सा प्रपलायत ।
रुदती च हसन्ती च पर्यायेण मुहुर्मुहुः ॥ १९३ ॥
प्लवस्थैर्जालिकै र्दूराच्छ्रुतकोलाहलैश्चिरम् ।
यत्नेन वीक्ष्यमाणापि नाभिजज्ञे स्वरूपतः ॥ १९४ ॥
आदिनान्तं बत भ्रान्त्वा निशायां गृहमागमत् ।
रूपान्तरमुपायाता योषिदन्येव कापि सा ॥ १९५ ॥

पुष्पिका.–कुलीनापि करोत्येव साहसं परिहिंसिता ॥

इति क्षमायाः कृतिषु
लोकवृत्ताख्यानमालायां कथापञ्चके
असूयिन्याख्याकथा पञ्चमी
समाप्ता ॥

१२–७–१९३२.

मुम्बापुरी.

॥ शुद्धाऽशुद्धपत्रिका ॥

पृष्ठाङ्क	श्लोकसङ्ख्या	अशुद्धम्	शुद्धम्
१		श्री	श्रीः
६	३७	ऽभुद्युत्रा	ऽभूद्युत्रा
८	४८	संलाप	सँल्लाप
११	७३	क्वाचत	क्वचित्
१२	७७	चरव्यु	चख्यु
१६	१०३	समाश्वसीत्	समादधात्
३०	५२	प्रतीक्षमाणा	प्रतीक्षमाणं
३२	६६	युष्मामि	युष्माभि
३६	९३	दर्पयेय	दर्पयेयं
,,	९७	क्वत्युत्वा	इत्युक्त्वा
३९	११६	द्वन्द	द्वन्द्व
४०	१२१	किं नु	किं नु
,,	१२३	स्थातुक्षमः	स्थातुमक्षमः
४१	१२६	पङ्गुश्च	पङ्गूश्च
४३	१२६	वत्तान्ताख्यान	वृत्ताख्यान
४७	११	सरव्यः	सख्यः
४८	३०	देहिनो	देहि नो
,,	३३	कंचिद्र	कश्चिद्र
५०	४७	वभ्राम	बभ्राम
५२	५८	तच्छर्षि	तच्छीर्ष
५३	६६	इत्युच्चैरूप	इत्युच्चै रूप
,,	६९	कार्यंऽहं	कार्यंऽहं
५५	८२	क्वथ्यते	क्वथ्यते
५७	९४	वभाषे	वभाषे

५८	९९	किंचिद्	किञ्चिद
	१०४	ग्रामण्यै	ग्रामण्ये
,,	१३४	कंचि	कञ्चि
६३	१३६	सार्धमैष्यसी	सार्धमेष्यसी
,,	१७४	स्फुरद्भ्रुशम्	स्फुरद्भृशम्
६८	१८५	यत्किंचि	यत्किञ्च
७०	१९०	मभ्यगात्	मभ्यगात्
७१	९	वादींत	वादीत्तं
७३	३७	यथेच्छया	यथेच्छया
७७	६४	वन्धुं	बन्द्ध
८१	८२	वह्वान	बह्वनि
८३	१०३	कांधेन	क्रोधेन
८६	११८	क्रोधवह्नि	क्रोधवह्नि
८८	३	वींचीपटलानां	वींचीपटलानां
९५	२६	चकित्रा	चकिता
९८	३२	त्रोटयन्ती	स्फोटयन्ती
९९	४२	गर्जतश्छदि	गर्जतश्छदि
१०१	५१	कोटि	कोटिं
१०२	५२	निगृह्नती	निगृह्णती
१०२	७२	श्रयते	शृयते
१०५	७६	श्वश्रक्रोध	श्वशूक्रोध
,,	८८	क्वचित	क्वचित्
१०७	१०२	रेवायाः	रेवाया
१०९	१२८	रवो	रेवा
११३	१३७	वाढं	बाढं
११४	१४६	वेःदु	वोदु
११५	१६४	साऽद्भुत	साऽद्भुत
११८			

लाल बहादुर शास्त्री राष्ट्रीय प्रशासन अकादमी, पुस्तकालय
Lal Bahadur Shastri National Academy of Administration Library
MUSSOORIE / मसूरी
अवाप्ति सं० / Acc. No.____

कृपया इस पुस्तक को निम्नलिखित दिनांक या उससे पहले वापस करें

Please return this book on or before the date last stamped below.

Due Date	Borrower's No	Due Date	Borrower's No.

Sans
891.21

GANDHI SMIRITI LIBRARY
AL BAHADUR SHASTRI
NATIONAL ACADEMY OF ADMINISTRATION
MUSSOORIE

Accession No. 13283

1. Books are issued for 15 days only but may have to be recalled earlier if urgently required.
2. An over-due charge of 25 Paise per day per volume will be charged.
3. Books may be renewed on request, at the discre-
4. ance books may not be
5. ed only in the Library.
d in any way shall have
price shall be paid by

GL SANS 891.21
ROW

126953
LBSNAA

Help to keep this book fresh, clean & moving.